Digitization by eGangotri-South Center

संस्कृतश्रीः

पाठमाला - 8

SAMSKRITASRI

(SANKSRIT)

Published by

SAMSKRIT EDUCATION SOCIETY (Regd.)

Head Office :
Old 212 / 13-1, New No. 11
St. Mary's Road, R.A. Puram,
Chennai - 600 028. Phone : 2495 1402

Admn Office :
283, T.T.K. Road,
Chennai - 600 018.

SECOND EDITION 2020 Price : 100/-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एतद्ग्रन्थम् अस्मत्पूज्यतमस्वर्गीयवैद्यश्रीराधाकृष्णशास्त्रिमहोदयस्य दिव्याङ्घ्रिद्वयं स्मृत्वा मनसा तस्मै समर्पयामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनुक्रमणिका

१. लीलागणेशः----------3

२. श्रीमद्वाल्मीकिरामायणे सुन्दरकाण्डे एकत्रिंशः सर्गः। ----------5

३. महाकविभर्तृहरिविरचितं नीतिशतकम् ----------9

४. कालिदासः महाकविः---------- 28

५. कविप्रशंसा। ---------- 46

६. कादम्बरी---------- 47

७. गङ्गावतरणम्। ---------- 68

८. अष्टाङ्गहृदयम्---------- 84

९. अकारान्तः पुल्लिङ्गः 'राम' शब्दः ---------- 87

१०. वृत्तिः---------- 94

११. वृत्तम् ---------- 99

१२. सुभाषितरत्नानि ----------102

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1.लीलागणेशः

सत्त्वादौ साभिलाषं स्ववहनविवशं वीतपाशाङ्कुशाभ्याम्
पाणिभ्यामूरुमध्ये निहितमभिमृशन् दक्षपाण्यङ्गुलीभिः।
किं भक्ष्ये तेऽभिलाषः? किमु मयि? निभृतं पश्य मामित्युदारम्
पृच्छन् मूकेऽथ मूषे, सदयहृदवताद् बालवेतण्डवक्त्रः॥

सत्त्वादौ	-	भोज्यवस्तुषु
साभिलाषं	-	इच्छायुक्तम्
स्ववहनविवशं	-	आत्मनः वाहनभूतं, मूषकम्
वीतपाशाङ्कुशाभ्यां	-	स्वायुधविशेषौ अङ्कुशपाशौ, तद्रहिताभ्याम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाणिभ्यां	-	कराभ्याम्
ऊरुमध्ये	-	आत्मन: ऊर्वो: मध्ये
निहितं	-	न्यस्तं
दक्षपाण्यङ्गुलीभि:	-	वामेतरकरस्य अङ्गुलीभि:
अभिमृशन्	-	परामृशन्
किं भक्ष्ये ते अभिलाष:?	–	तव इच्छा भोज्ये वा?
किमु मयि?	-	अथवा मयि स्पृहा?
निभृतं	-	विश्रब्ध: सन्
मां	-	तव स्वामिनं गणेशं माम्
पश्य	-	ईक्षस्व
इति पृच्छन्	-	प्रश्नद्वारा भाषमाण: विनायक:

अथ

मूके मूषे	-	किमपि उत्तरं दातुम् असमर्थे मूषिके
सदयहृद्	-	स्वभक्तेषु, स्ववाहनभूतमूषिके च कृपालु:
बालवेतण्डवक्त्र:	-	गजपोतस्येव शुण्डायुक्त: गजानन:
अवतात्	-	अस्मान् रक्षतु

- - -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. श्रीमद्वाल्मीकिरामायणे सुन्दरकाण्डे एकत्रिंशः सर्गः।

रामवृत्तसंश्रवः - श्रीहनुमता सीतादेव्यै श्रीरामकथाकथनम्।

१ एवं बहुविधां चिन्तां चिन्तयित्वा महाकपिः।
संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह॥

२ राजा दशरथो नाम रथकुञ्जरवाजिमान्।
पुण्यशीलो महाकीर्तिर्ऋजुरासीन्महायशाः॥

३ राजर्षीणां गुणश्रेष्ठस्तपसा चर्षिभिः समः।
चक्रवर्तिकुले जातः पुरन्दरसमो बले॥

४ अहिंसारतिरक्षुद्रो घृणी सत्यपराक्रमः।
मुख्यश्चेक्ष्वाकुवंशस्य लक्ष्मीवान् लक्ष्मिवर्धनः॥

५ पार्थिवव्यञ्जनैर्युक्तः पृथुश्रीः पार्थिवर्षभः।
पृथिव्यां चतुरन्तायां विश्रुतः सुखदः सुखी॥

६ तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः।
रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम्॥

७ रक्षिता स्वस्य वृत्तस्य स्वजनस्यापि रक्षिता।
रक्षिता जीवलोकस्य धर्मस्य च परंतपः॥

८ तस्य सत्याभिसन्धस्य वृद्धस्य वचनात् पितुः।
सभार्यः सह च भ्रात्रा वीरः प्रव्राजितो वनम्॥

९ तेन तत्र महारण्ये मृगयां परिधावता।
राक्षसा निहताः शूरा बहवः कामरूपिणः॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१० जनस्थानवधं श्रुत्वा हतौ च खरदूषणौ।
ततस्त्वमर्षापहृता जानकी रावणेन तु॥

११ वञ्चयित्वा वने रामं मृगरूपेण मायया।
स मार्गमाणस्तां देवीं रामः सीतामनिन्दिताम्॥

१२ आससाद वने मित्रं सुग्रीवं नाम वानरम्।
ततः स वालिनं हत्वा रामः परपुरंजयः॥

१३ प्रायच्छत् कपिराज्यं तत् सुग्रीवाय महाबलः।
सुग्रीवेणापि संदिष्टा हरयः कामरूपिणः॥

१४ दिक्षु सर्वासु तां देवीं विचिन्वन्ति सहस्रशः।
अहं संपातिवचनाच्छतयोजनमायतम्॥

१५ अस्या हेतोर्विशालाक्ष्याः सागरं वेगवान् प्लुतः।
यथारूपां यथावर्णां यथालक्ष्मीं च निश्चिताम्॥

१६ अश्रौषं राघवस्याहं सेयमासादिता मया।
विररामैवमुक्त्वासौ वाचं वानरपुङ्गवः॥

१७ जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता।
ततः सा वक्रकेशान्ता सुकेशी केशसंवृतम्॥
उन्नम्य वदनं भीरुः शिंशपामन्ववैक्षत॥

१८ निशम्य सीता वचनं कपेश्च दिशश्च सर्वाः प्रदिशश्च वीक्ष्य।
स्वयं प्रहर्षं परमं जगाम सर्वात्मना राममनुस्मरन्ती॥

१९ सा तिर्यगूर्ध्वं च तथाप्यधस्तान्निरीक्षमाणा तमचिन्त्यबुद्धिम्।
ददर्श पिङ्गाधिपतेरमात्यं वातात्मजं सूर्यमिवोदयस्थम्॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्वयः -

१ महाकपिः एवं बहुविधां चिन्तां चिन्तयित्वा वैदेह्याः संश्रवे मधुरं वाक्यं व्याजहार।

२ रथकुञ्जरवाजिमान् पुण्यशीलः महाकीर्तिः ऋजुः महायशाः दशरथो नाम राजा आसीत्।

३ राजर्षीणां गुणश्रेष्ठः तपसा ऋषिभिः समः चक्रवर्तिकुले च जातः बले पुरन्दरसमः।

४ अहिंसारतिः अक्षुद्रः घृणी सत्यपराक्रमः इक्ष्वाकुवंशस्य मुख्यः लक्ष्मीवान् लक्ष्मिवर्धनः।

५ पार्थिवव्यञ्जनैः युक्तः पृथुश्रीः पार्थिवर्षभः चतुरान्तायां पृथिव्यां विश्रुतः सुखदः सुखी।

६ तस्य प्रियः ज्येष्ठः पुत्रः रामः नाम ताराधिपनिभाननः विशेषज्ञः सर्वधनुष्मतां श्रेष्ठः।

७ स्वस्य वृत्तस्य रक्षिता स्वजनस्यापि रक्षिता जीवलोकस्य धर्मस्य च रक्षिता परन्तपः।

८ सत्याभिसन्धस्य वृद्धस्य पितुः वचनात् सभार्यः भ्रात्रा च सह वीरः वनं प्रव्राजितः।

९ तत्र महारण्ये मृगयां परिधावता तेन कामरूपिणः शूराः बहवः राक्षसाः निहताः।

१० रावणेन जनस्थानवधं खरदूषणौ हतौ च श्रुत्वा वने रामं मायया मृगरूपेण वञ्चयित्वा जानकी अमर्षापहृता।

११ सः रामः अनिन्दितां तां सीतां वने मार्गमाणः सुग्रीवं नाम वानरं मित्रम् आससाद।

१२ ततः महाबलः परपुरञ्जयः सः रामः वालिनं हत्वा तत् कपिराज्यं सुग्रीवाय प्रायच्छत्।

१३ सुग्रीवेण सन्दिष्टाः हरयः कामरूपिणः सहस्रशः तां देवीं सर्वासु दिक्षु अपि विचिन्वन्ति।

१४ अहं संपातिवचनात् वेगवान् तस्याः विशालाक्ष्याः हेतोः शतयोजनम् आयतं सागरं प्लुतः।

१५ अहं राघवस्य निश्चितां यथारूपां यथावर्णां यथालक्ष्मीम् अश्रौषं सा इयं मया आसादिता।

१६ वानरपुङ्गवः असौ एवं वाचम् उक्त्वा विरराम, जानकी च तत् श्रुत्वा अपि परमं विस्मयं गता।

१७ ततः वक्रकेशान्ता सुकेशी सा भीरुः केशसंवृतं वदनम् उन्नम्य शिंशपाम् ऐक्षत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१८ सर्वात्मना रामम् अनुस्मरन्ती सीता सर्वाः दिशः च प्रदिशः च वीक्ष्य कपेः वचनं स्वयं निशम्य च परमं प्रहर्षं जगाम।

१९ सा तिर्यक् ऊर्ध्वम् अधस्तात् च तथाऽपि निरीक्षमाणा अचिन्त्यबुद्धिं पिङ्गाधिपतेः अमात्यं वातात्मजम् उदयस्थं सूर्यम् इव तं ददर्श।

इत्यार्षे श्रीमद्रामायणे सुन्दरकाण्डे एकत्रिंशः सर्गः॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. महाकविभर्तृहरिविरचितं नीतिशतकम्

१) लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटञ्छशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥

अन्वयः - यत्नतः पीडयन् सिकतासु अपि तैलं लभेत। पिपासार्दितश्च मृगतृष्णिकासु सलिलं पिबेत्। पर्यटन् कदाचित् शशविषाणमपि आसादयेत्। तु प्रतिनिविष्टमूर्खजनचित्तं न आराधयेत्।

टीका – यत्नतः - प्रयत्नात्, पञ्चम्यास्तसिल्। पीडयन् - मर्दयन् । सिकतासु - वालुकासु अपि। तैलं - स्नेहः। लभेत - प्राप्तुं शक्यम्। पिपासार्दितः - पातुमिच्छा पिपासा,तया पीडितः। च। मृगतृष्णिकासु - (मृगाणां तृष्णा अस्यां, तासु)मरीचिकासु, केवलं जलभ्रमदायिनीषु मरीचिकासु। सलिलं - जलं। पिबेत् - पातुं शक्यम्। पर्यटन् - तत्र तत्र भूम्यां भ्रमणं कुर्वन्। कदाचित्। शशविषाणम् अपि - शशकस्य शृङ्गम् अपि। आसादयेत् - प्राप्तुम् शक्नुयात्। तु - किन्तु। प्रतिनिविष्ट - मूर्खजन - चित्तं - दुराग्रहाविष्टस्य मूर्खस्य मनः। न आरधयेत् - प्रसादयितुं न शक्नुयात्।

भावार्थः - कोऽपि नरः प्रयत्नयुक्तः मर्दयन् वालुकास्वपि तैलं प्राप्तुं शक्नोति। तृष्णातुरः मनुष्यः मृगमरीचिकासु अपि जलं पातुं शक्नुयात्। सदा भूप्रदेशे भ्रमणं कुर्वन् नरः कदाचित् शशशृङ्गमपि लभेत। किन्तु दुराग्रहाविष्टदुर्बुद्धेः मूढस्य चित्तम् अनुकूलयितुं न शक्यम्।

कोषः - "मृगतृष्णा मरीचिका"। आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्। - अमरः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वृत्तम् - पृथ्वी वृत्तम्।

२) यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥

अन्वयः - अहं यदा किञ्चिज्ज्ञः अभवं (तदा) द्विपः इव मदान्धः समभवं 'सर्वज्ञः अस्मि' इति मम मनः अवलिप्तम् अभवत्। (परन्तु) यदा बुधजनसकाशात् किञ्चित् किञ्चिद् अवगतं, तदा 'मूर्खः अस्मि' इति मे मदो ज्वर इव व्यपगतः ।

टीका – अहं यदा। किञ्चिज्ज्ञः - किञ्चिज्जानातीति किञ्चिज्ञः - स्वल्पज्ञानयुक्तः। अभवं। तदा । द्विपः - गजः । इव। मदेन अन्धः - गजपक्षे मदमत्तः, अन्यत्र गर्वेणोद्धतः। अभवम्। तदा। सर्वज्ञः अस्मि - सर्ववेत्तास्मीति। मे मनः - मम चित्तं। अवलिप्तं – दर्पयुक्तम्। आसीत्। (किन्तु) यदा। बुधजनसकाशात् - विद्वज्जनानां संपर्कात्। किञ्चित् किञ्चित् - स्वल्पं स्वल्पं। अवगतं - ज्ञातं/विदितं। तदा। मूर्खः अस्मि - बुद्धिहीनः भवामि। इति मे । मदः - गर्वः। ज्वरः इव। व्यपगतः - मत्तः विनष्टः।

कोषः - 'दन्ती दन्तावलो हस्ती द्विरदः अनेकपः द्विपः' इत्यमरः। 'स्वान्तं हृन्मानसं मनः' इत्यमरः।'अज्ञो मूढो यथाजातः वैधेयः बालिशः तथा मूर्खः.....' इत्यमरः।

३) शिरः शार्वं स्वर्गात् पशुपतिशिरस्तः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।
अधोऽधो गङ्गेयं पदमुपगदा स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्वयः - इयं गङ्गा स्वर्गात् शार्वं शिरः पशुपतिशिरस्तः क्षितिधरम् उत्तुङ्गात् महीध्रात् अवनिम्, अपि च, अवनेः जलधिं(एवं) अधः अधः स्तोकं पदम् उपगता। अथवा विवेकभ्रष्टानां विनिपातः शतमुखः भवति।

टीका - इयं –एषा पुरः दृश्यमाना। गङ्गा - भागीरथी। स्वर्गात् - देवलोकात्। शार्वं – शर्वस्य इदं शार्वं, शिवस्य, शिरः - मस्तकं, पशुपतिशिरस्तः - महादेवशिरसः। क्षितिधरं – क्षितिं धरति इति क्षितिधरः, तं - हिमालयं। उत्तुङ्गात् – उन्नतात्। महीध्रात् – हिमगिरेः। अवनिं – भूमिं/पृथ्वीं। अपि च। अवनेः - भूमेः। जलधिं – सागरं। (एवं) अधः अधः - नीचान्नीचतरं। स्तोकं – तुच्छं। पदं – स्थानं। उपगता – प्राप्ता। अथवा । विवेकभ्रष्टानां - अविवेकिनां। विनिपातः - पतनं। शतमुखः - शतम् मुखानि यस्य सः, अनेकप्रकारतया , भवति।

कोषः - 'ईश्वरः शर्वः ईशानः' इति अमरः। 'उत्तमाङ्गं शिरः शीर्षं' –अमरः।'गोत्रा कुः पृथिवी, पृथ्वी क्ष्मा मेदिनी मही' – अमरः।

४) क्षान्तिश्चेत्कवचेन किं, किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं, यदि सुहृद्दिव्यौषधैः किं फलम्।
किं सर्पैर्यदि दुर्जनाः, किमु धनैर्विद्याऽनवद्या यदि,
व्रीडा चेत्किमु भूषणैः, सुकविता यद्यस्ति राज्येन किम्॥

अन्वयः - देहिनां क्षान्तिश्चेत् कवचेन किं फलं, क्रोधः अस्ति चेत् अरिभिः किं(फलं), ज्ञातिश्चेत् अनलेन किं, यदि सुहृद् (अस्ति) दिव्यौषधैः किं फलम्? यदि दुर्जनाः (सन्ति) सर्पैः किं, यदि अनवद्या विद्या (अस्ति) धनैः किमु? व्रीडा चेद् भूषणैः किमु, यदि सुकविता अस्ति राज्येन किं (फलमस्ति)।

टीका - देहो येषाम् अस्ति ते देहिनः, तेषां शरीरधारिणां प्राणिनां नराणामिति भावः। क्षान्तिः - क्षमा तितिक्षा परिभवादिक्रोधोत्पादकहेतुषु तत्प्रतिबन्धभावः चेत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कवचेन –वर्मणा, । किं फलं, न किञ्चित्। क्रोधश्चेत् – कोपः अमर्षः यद्यस्ति।अरिभिः - शत्रुभिः किं?। ज्ञातिः - दायादः। चेत् – यद्यस्ति। अनलेन – अग्निना। किं फलम्, अग्निवद् दायाद एव दाहकः। यदि सुहृद् - मित्रमस्ति चेत्। दिव्यैः औषधैः - सिद्धौषधैः किं फलम्। मित्रम् एव सर्वरोगाणां निवारकः, क्षान्तिदायकः च। यदि दुर्जनाः - खलाः सन्ति। सर्पैः - भुजङ्गैः किं कार्यं, ते एव प्राणहरणे पर्याप्ताः। यदि अनवद्या विद्या – प्रशस्ता विद्या अस्ति चेत्। धनैः किं – द्रव्यैः किं प्रयोजनम्? विद्या एव् महद्धनं। व्रीडा –लज्जा, अकार्यकरणे मनसः सङ्कोचः। यद्यस्ति। भूषणैः - अलङ्कारैः किमु, व्रीडा एव सर्वालङ्काराणां श्रेष्ठा । यदि सुकविता – पाण्डित्यं/सहृदयानन्दकरी काव्यशक्तिः वा अस्ति। राज्येन किं – सुकवितैव सहृदयानन्दकर्तृत्वात् सर्वलोकवशीकरीति, सैव प्रभुत्वदायिनी।

कोशः - 'क्षान्तिः तितिक्षा' –अमरः। 'उरश्छदः कङ्कटको जगरःकवचोऽस्त्रियाम्' – अमरः। 'कोप - क्रोध - अमर्ष - रोष - प्रतिघाः' –अमरः। 'सगोत्र - बान्धव - ज्ञाति - बन्धु - स्वजनाः समाः' - अमरः।'कृशानुः पावकः अनलः' - अमरः 'अथ मित्रं सखा सुहृत्' - अमरः। 'मन्दाक्षं ह्रीस्त्रपा लज्जा व्रीडा' - अमरः। संख्यावान् पण्डितः कविः - अमरः।

वृत्तं – शार्दूलविक्रीडितम्।

५) स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति, न तु तत्तस्य क्षुधाशान्तये।
सिंहो जम्बूकमङ्गमागतमपि त्यक्त्वा निहन्ति द्विपं,
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्वानुरूपं फलम्॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्वयः - श्वा स्वल्पस्नायुवसावशेषमलिनं निर्मांसम् अपि गोः अस्थि लब्ध्वा परितोषम् एति। तत् तु तस्य क्षुधाशान्तये न। सिंहः अङ्गमागतमपि जम्बुकं त्यक्त्वा द्विपं निहन्ति। कृच्छ्रगतः अपि सर्वः जनः सत्त्वानुरूपं फलं वाञ्छति।

टीका – श्वा –कुक्कुरः। स्वल्पः - अल्पमेव/लेशमात्रस्थितः। स्नायुःच - वसा च,तयोः अवशेषः - अवशिष्टभागः, तेन, मलिनं - मलदूषितं। निर्मांसं - मांसरहितमपि। गोः। अस्थिः - कीकसं। लब्ध्वा - प्राप्य। परितोषम् एति - सन्तुष्यति/नन्दति। तत् तु - तदस्थिः तु। तस्य - शुनकस्य। क्षुधाशान्तये - बुभुक्षा(भोक्तुं इच्छा) - बुभुक्षायाः निवारणाय न, पर्याप्तं भवति। सिंहः - हरिः/केसरी/कण्ठीरवः/पंचनखः/मृगाशनः/मृगद्विट्/मृगेन्द्रः। अङ्गं - उत्सङ्गं, आगतं - प्राप्तम्, अपि। जम्बुकं - श्रृगालं। त्यक्त्वा - अनादृत्य। द्विपं - गजं। निहन्ति - मारयति/हन्ति/विदारयति। कृच्छ्रगतः - सङ्कटापन्नः/कष्टं प्राप्तः। अपि। सर्वः जनः - सर्वो लोकः। सत्त्वस्य - वस्तुनः। अनुरूपं - स्वशक्त्यनुरूपं। फलं - लाभमेव। वाञ्छति - अभिलषति।

वृत्तं - शार्दूलविक्रीडितम्।

कोशः - वस्नसास्नायुः स्त्रियाम्। मेदस्तु वपा वसा - अमरः। शुनको भषकः श्वा स्यात् - अमरः। श्रृगालः वञ्चकः क्रोष्टा फेरुः गोमायुः फेरवः जम्बूकः - अमरः।

६) लाङ्गूलचालनमधश्चरणावपातं, भूमौ निपत्य वदनोदरदर्शनं च।
श्वा पिण्डदस्य कुरुते, गजपुङ्गवस्तु धीरं विलोकयति, चाटुशतैश्च भुङ्क्ते।

अन्वयः - श्वा पिण्डदस्य(पुरतः) लाङ्गूलचालनम्, अधः चरणावपातं भूमौ निपत्य वदनोदरदर्शनं च कुरुते। तु गजपुङ्गवो धीरं विलोकयति चाटुशतैः च भुङ्क्ते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

टीका - श्वा – शुनकः। पिण्डदस्य - पिण्डं ददाति इति पिण्डदः,तस्य - अन्नदातुः। पुरतः। लाङ्गूलस्य - पुच्छस्य, चालनं - संचालनं। अधः। चरणावपातं - पादयोः पतनं। भूमौ - पृथिव्यां। निपत्य - पतित्वा। वदनं - मुखं, उदरं - जठरं,तयोः, दर्शनं - प्रदर्शनं। च। कुरुते - विधत्ते। गजपुङ्गवः तु - इभराजः तु। अन्नदातुः सन्निधौ। धीरं - गम्भीरं। विलोकयति - शान्तचित्तेन पश्यति। चाटुशतैः - अनेकशिष्टवचनानन्तरम्/ अनेकप्रियोक्तिभिः च। भुङ्क्ते - खादति।

कोशः - चटु चाटु श्लाघा - अमरः।

वृत्तं – वसन्ततिलका।

७) परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिम्॥

अन्वयः - परिवर्तिनि संसारे कः (वा) न मृतः (कः) वा (न) जायते। स एव जातः येन जातेन वंशः समुन्नतिं याति।

टीका - परिवर्तिनि - धर्म - अधर्मवशात् परिवर्तनशीले। संसारे - संसरणशीले जगति। को वा - पुमान्। न मृतः - न म्रियते। वा न जायते – को वा न उत्पद्यते। सः - पुमान्/नरः। एव। जातः - उत्पन्नः। येन जातेन - येन उत्पन्नेन। वंशः - कुलं। समुन्नतिं – वृद्धिं/समुत्कर्षं। याति_ गच्छति। वस्तुतः सर्वे एव प्राणिनः जन्ममृत्युधर्माणः। उक्तं च श्रीमद् भगवद्गीतायां –जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य चेति - २/२७।

कोशः - ' कुलम्, अभिजनः अन्वयः वंशः अन्ववायः संतानः' –अमरः।

८) कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य, शीर्यते वन एव वा ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्वयः - मनस्विनः कुसुमस्तबकस्य इव द्वयी वृत्तिः (भवति) सर्वलोकस्य मूर्ध्नि वा (तिष्ठति), वने एव वा शीर्यते ।

टीका – मनस्विनः - मानिनः/धीरपुरुषस्य। कुसुमस्तबकस्य - पुष्पाणां गुच्छः, तस्य। इव। द्वयी – द्विविधा। वृत्तिः - वर्तनं/व्यापारः। भवति। सर्वलोकस्य - सकलजनस्य। मूर्ध्नि - शिरसि। तिष्ठति। वने - कानने एव। वा। शीर्यते_ विनश्यति/जीर्यते वा। उत्तररामचरित्रे 'नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा मूर्ध्नि स्थितिर्न चरणैरवताडनानि' – भवभूतिः ।

कोशः - 'स्यात् गुच्छकस्तु स्तबकः' – अंमरः। वृत्तिः वर्तनजीवने - अमरः।

अलङ्कारः - अत्र उपमानं – कुसुमस्तबकः, उपमेयं – मनस्वी, साधारणधर्मः - द्वयी वृत्तिः, उपमावाचकं – इव, इत्यत्र उपमालङ्कारः।

९) वहति भुवनश्रेणिं शेषः फणाफलकस्थितां,
कमठपतिना मध्येपृष्ठं सदा स च धार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरात्
अहह! महतां निःसीमानश्चरित्रविभूतयः॥

अन्वयः - शेषः फणाफलकस्थितां भुवनश्रेणिं वहति। स च कमठपतिना सदा मध्ये पृष्ठं धार्यते। तमपि पयोधिः अनादरात् क्रोडाधीनं कुरुते। अहह! महतां चरित्रविभूतयः निःसीमानः (भवन्ति)।

टीका – शेषः - सर्पराजः अनन्तः। फणाः एव फलकानि तेषु –फणापट्टे, स्थितां - अवस्थितां। भुवनानां श्रेणिः तां - लोकानां पंक्तिं/लोकराजिं। वहति – धारयति। सः च - सर्पराजः। कमठपतिना - कूर्मरूपिणा भगवता विष्णुना। पृष्ठस्य मध्ये - निजखर्परोपरि देशे। सदा - सततं। धार्यते - उह्यते। तमपि - कमठराजम् अपि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पयांसि धीयन्ते अस्मिन्, पयोधिः - समुद्रः। अनादरात् - अवहेलया। क्रोडाधीनं - अङ्कगतं कुरुते, विष्णोः अवतारेण आदिवराहेण निजदंष्ट्रया पृथिव्याः समुद्धारः कृतः। अहह! - आश्चर्यं। महतां - महानुभावानां। चरित्र - विभूतयः - आचरणानां संपदः। निःसीमानः - अपरिमिताः। भवन्ति।

कोशः - वीथ्यालिरावलिः पंक्तिः श्रेणी - अमरः।

वृत्तं – हरिणी।

अलङ्कारः - १) मालादीपकं - लक्षणं – 'दीपकं वर्ण्यावर्ण्यानां धर्मैक्यम्', दीपकैकावलीयोगात् मालादीपकमिष्यते'। आद्यं पूर्वं पूर्वं वस्तु यथा उत्तरम् उत्तरं वस्तु प्रति उपकारकं चेत्, तदा मालादीपकम्। यथा मालायां पूर्वं पूर्वं ग्रथितपुष्पाणाम् उत्तरोत्तर - धारणात् उपकारकत्वात्, तथा शेषकमठपतिपयोधीनां पूर्वोत्तर - उपकारकत्वं मालादीपकसमन्वयः।

२) अर्थान्तरन्यासः 'महतां निःसीमानः चरित्रविभूतयः' इति सामान्यविषयद्वारा, शेषनागादिभिः पृथिव्यादीनां धारणरूपविशेषविषयाणां समर्थनमिति कारणात् अर्थान्तरन्यासालङ्कारः।

१०) यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः, स श्रुतवान्गुणज्ञः ।
स एव वक्ता, स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ते ॥

अन्वयः - यस्य वित्तम् अस्ति स नरः कुलीनः, सः पण्डितः सः श्रुतवान् (सः) गुणज्ञः, सः एव वक्ता, सः दर्शनीयः च सर्वे गुणाः काञ्चनम् आश्रयन्ते

टीका – यस्य पुंसः समीपे। वित्तं - धनमस्ति। सः नरः - मनुष्यः कुले जातः। कुलीनः - महाकुलप्रसूतः,अभिजनवान्। सः नरः। पण्डितः, पण्डा सूक्ष्मा बुद्धिःअस्य अस्ति इति पण्डितः - विद्वान्। सः नरः। श्रुतं, शास्त्रम् अस्यास्तीति श्रुतवान्, शास्त्रज्ञः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सः गुणान् जानातीति गुणज्ञः - गुणग्राही,। सःएव नरः। वक्ता - वाग्मी । सः नरः।दर्शनीयः - सुरूपः च। केवलं वित्तेन कुतः सर्वे गुणाः, समागता इत्याशङ्क्याह - सर्वे गुणाः। काञ्चनं – स्वर्णं,वित्तमिति। आश्रयन्ते - संश्रयन्ते,भजन्ते।

कोशः - 'कुलान्यभिजनान्वयौ' – अमरः। प्राज्ञः संख्यावान् पण्डितः - अमरः।

वृत्तं - उपजाति

अलङ्कारः - १) लक्षणं - काव्यलिङ्गं - समर्थनीयस्य अर्थस्य समर्थनम्' । 'मनुष्याणां जीवने तेषां कुलीनत्वादिविषयाः सर्वे वित्ताश्रयाः एव भवन्ति', इति समर्थनीयस्य अर्थस्य समर्थनं 'सर्वे गुणाः काञ्चनमाश्रयन्ते' इति वाक्यार्थेन क्रियते इत्यत्र काव्यलिङ्गालङ्कारः।

११) परिक्षीणः कश्चित् स्पृहयति यवानां प्रसृतये,
स पश्चात्संपूर्णः कलयति धरित्रीं तृणसमाम्।
अतश्चानैकान्त्याद् गुरुलघुतयाऽर्थेषु धनिनाम्
अवस्था वस्तूनि प्रथयति च, सङ्कोचयति च॥

अन्वयः - कश्चित् परिक्षीणः यवानां प्रसृतये स्पृहयति, सः पश्चात् संपूर्णः धरित्रीं तृणसमां कलयति। अतः च अर्थेषु गुरुलघुतया अनैकान्त्यात् धनिनां अवस्था वस्तूनि प्रथयति सङ्कोचयति च।

टीका –कश्चित् - कोऽपि नरः। परिक्षीणः - दैवाद् अतिदरिद्रः। यवानां - यवाख्यधान्यानां। प्रसृतये - चुलुकाय/अञ्जलिमात्राय। स्पृहयति - इच्छति/अभिलषति, प्रसृतिमात्रं यवमेव पूर्वं बहुमत्वा कामयते, सः एव पश्चात् भाग्यपरिवर्तने। संपूर्णः - धनिकः/धनाढ्यः सन्। स एव पुमान्, धरित्रीं - पृथ्वीं।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृणसमां - अतितुच्छां। कलयति - मनुते। धनमदेन सर्वम् जगत् एतावते नराय तृणायते इत्यर्थः। अतः च - अत एव। अर्थेषु - यवधरित्र्यादिषु। गुरुलघुतया - महत्व - अल्पत्व भावेन। अनैकान्त्यं - न एकान्तं - अनेकान्तं, तस्य भावः, तस्मात् अनियतत्वात्। धनिनां - संपत्तियुक्तानां। अवस्था - दशा। वस्तूनि - पदार्थान्। प्रथयति - दरिद्रावस्थायां विस्तारयति। संकोचयति - संपन्नावस्थायां महदपि वस्तु लघूकरोति च। धनिनां दशा एव वस्तूनि लघूकरोति, विस्तारयति च। अतो विवेकिना नैवं भवितव्यम्।

कोशः - 'पाणिर्निकुञ्जः प्रसृतिः'(निश्शेषेण कुञ्जीकृतः पाणिः प्रसृतिः स्यात्) –अमरः। 'शितशूकयवौ समौ" - अमरः। 'धरा धरित्री धरणिः क्षोणीर्ज्या काश्यपी क्षितिः _ अमरः।

वृत्तं - शिखरिणी

१२) आरम्भगुर्वी, क्षयिणी क्रमेण, लघ्वी पुरा, वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्ध - परार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम्।

अन्वयः - खलसज्जनानां मैत्री आरम्भगुर्वी क्रमेण क्षयिणी पुरा लघ्वी पश्चात् च वृद्धिमती (अतः) पूर्वार्ध - परार्ध - भिन्ना दिनस्य छाया इव (भवति)।

टीका - खलसज्जनानां - खलाः - दुर्जनाः, सज्जनाः - सत्पुरुषाः तेषां, दुर्जनसुजनानां। मैत्री - मित्रता। आरम्भगुर्वी - प्रारम्भसमये महती। क्रमेण - समयक्रमेण। क्षयिणी - क्षीयमाणा। पुरा - पूर्वं। लघ्वी - ह्रस्वा। पश्चात् कालक्रमेण, पुनः च वृद्धिमती - वर्धिष्णुः भवतीत्यर्थः। अतः पूर्वार्ध - परार्ध - भिन्ना –पूर्वाह्ण पराह्ण भेदेन। दिनस्य - दिवसस्य। छाया इव - अनातपः इव। यथा दिवसस्य आरम्भे छाया गुर्वी भवति,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमेण च मध्याह्नं यावत् क्षीयमाणा भवति, अपराह्णस्य प्रारम्भे लघ्वी, पुनश्च क्रमेण वृद्धिमती भवति। तेनैव प्रकारेण खलानां मैत्री प्रारम्भे स्वार्थसाधनार्थं घनिष्ठा भवति, क्रमशः च क्षीयते, किन्तु सज्जनानां मैत्री प्रारम्भे लघ्वी, अनन्तरं च परिचयात् घनिष्ठा भवति।

कोश - 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' – अमरः।

अलङ्कारः - यथासंख्यालङ्कारः - 'क्रमेणैव क्रमिकाणां समन्वयः'। क्रमेणोक्तानां पदार्थानां तेनैव क्रमेणान्वयः। अत्र खलानां मैत्री आरम्भगुर्वी तदनन्तरं क्षयिणी। एवं सज्जनानां मैत्री आरम्भलघ्वी क्रमेण वृद्धिमती इति क्रमेणान्वेति इत्यनेन यथासंख्यालङ्कारः।

उपमा - अत्र उपमानभूतायाः छायायाः उपमेयभूतायाः मैत्र्याः सादृश्यवर्णनात् उपमालङ्कारः।

वृत्तं - उपजाति

१३) प्रदानं प्रच्छन्नं, गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं, सदसि कथनं चाप्युपकृतेः।
अनुत्सेको लक्ष्म्यां, निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्॥

अन्वयः - प्रदानं प्रच्छन्नं, गृहम् उपगते संभ्रमविधिः, प्रियं कृत्वा मौनं, सदसि च उपकृतेः कथनं, लक्ष्म्याम् अनुत्सेकः, परकथाः निरभिभवसाराः, इदं विषमम् असिधाराव्रतं सतां केन उद्दिष्टम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

टीका - प्रदानं - दानं। प्रच्छन्नं - गुप्तं, तथाविधदानस्य प्राशस्त्यात् 'दत्त्वा न परिकीर्तयेत्'। गृहं उपगते - स्वनिकेतनम् आगते। सम्भ्रमविधिः - आदरस्य/संवेगस्य वा क्रिया/प्रदर्शनं। प्रियं कृत्वा मौनं - अन्यस्य हितम् कृत्वा तूष्णींभावः, कृतस्य अपरिकीर्तनं। सदसि च – विद्वत्सभायाम्, अन्यकृतायाः। उपकृतेः - उपकारस्य। कथनं - प्रकाशनं, तत्र मौनं कृतघ्नस्य सूचनं। लक्ष्म्यां - समृद्धौ। अनुत्सेकः - गर्वराहित्यं। परकथाः - अन्येषां प्रसङ्गेषु। निरभिभवसाराः - निन्दावर्जनम्। इदम् विषमं - इदं सर्वं दुष्करं/कठिनं। असिधाराव्रतं - खड्गधारा इव तीक्ष्णं व्रतं। सतां - सज्जनानां। केन उद्दिष्टं –प्रदर्शितं/उपदिष्टम् ।

कोशः - 'गृहं गेहोदवसितं – अमरः। ' अथितिर्ना गृहागते' – अमरः। 'गन्धो गन्धक आमोदे लेशे' – विश्वः।

वृत्तं - शिखरिणी ।

समुच्चयः लक्षणं

- 'बहूनां युगपद्भावभाजां गुम्फः समुच्चयः'। कुवलयानन्दे समुच्चयालङ्कारस्योदाहरणरूपेण इदं पद्यम् उद्धृतम्। यस्मिन् अलङ्कारे कार्यस्य सिद्धिः, तथा उत्पत्तिः एकस्मिन् साधके एव वर्तते, तत्र समुच्चयालङ्कारः। अत्र असिधारव्रतम् इति एकस्मिन् साधके, प्रथम - द्वितीय - तृतीयपादानां सिद्धिः, उत्पत्तिः च वर्तन्ते इत्यनेन समुच्चयालङ्कारः।

१४) संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते,
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्वयः - सन्तप्तायसि संस्थितस्य पयसः नाम अपि न ज्ञायते। तत् एव नलिनीपत्रस्थितं मुक्ताकारतया राजते। तत् स्वात्यां सागरशुक्तिमध्यपतितं मौक्तिकं जायते। प्रायेण अधममध्यमोत्तमगुणः संसर्गतः जायते।

टीका - सन्तप्त - अग्नौ दाहाज्ज्वलितं, अयः - लौहः, तस्मिन्। संस्थितस्य - निक्षिप्तस्य इत्यर्थः। पयसः - जलस्य। नाम अपि न ज्ञायते - जलम् विलुप्तं भवति, मूलनाश एव, स्वरूपदर्शनं तु किं वक्तव्यमित्यर्थः। तदेव जलं। नलिनीपत्रस्थितं - पद्मपत्रगतं सत्। मुक्ताया आकारतया - मौक्तिकरूपेण। राजते - शोभते। तद् जलं। स्वात्यां - स्वातीनक्षत्र - योगे सति। सागरे - समुद्रे, या शुक्तिः - मुक्तास्फोटः, तस्याः, मध्ये - उदरे / अन्तराले, पतितं - गतमित्यर्थः। मौक्तिकं - मुक्तारत्नं। जायते - भवति। प्रायेण - प्रायशः। अधमः मध्यमः उत्तमश्च गुणः। संसर्गतः - तद्गुणयुक्तानां पदार्थानां संपर्काद् जायते।

जायते' क्रियायाः द्विवारं प्रयोगात् कथितपददोषस्य कैश्चिदुद्भावना।

कोशः सलिलं जलं कमलं अमरः।

यथासंख्यालङ्कारः - तप्तायस्थजलं, नलिनीपत्रस्थजलं, शुक्तिमध्यपतितजलं च क्रमेण अधममध्यमोत्तमगुणैः सादृश्यत्वेन अन्वयन्ति इत्यनेन यथासंख्यालङ्कारः ऊह्यः।

वृत्तं - शार्दूलविक्रीडितम्

१५) यः प्रीणयेत्सुचरितैः पितरं स पुत्रो, यद् भर्तुरेव हितमिच्छति तत्कलत्रम्।
तन्मित्रमापदि सुखे च समक्रियं यदेतत्त्रयं जगति पुण्यकृतो लभन्ते॥

अन्वयः - यः सुचरितैः पितरं प्रीणयेत् स(एव) पुत्रः, यद् भर्तुः हितम् इच्छति तत् एव कलत्रं, यत् आपदि सुखे च समक्रियं तत् (एव) मित्रं, एतत् त्रयं जगति पुण्यकृतः लभन्ते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

टीका - यः पुत्रः सुचरितैः - सदाचारैः। पितरं - जनकं। प्रीणयेत् - सन्तोषयेत्। सः एव। पुन्नाम - नरकात् त्रायते इति पुत्रः - सुतः उच्यते। यद् भर्तुः - पत्युः। हितं - कल्याणं। इच्छति - वाञ्छति। तदेव,तादृग्गुणयुक्तमेव। कलत्रं - भार्या। यद् आपदि - विपत्तौ। सुखे - सम्पदि च। समक्रियं - समानः व्यापारः यस्य तत्, अविषमव्यापारमित्यर्थः। तदेव। मित्रं - सुहृत्।एतत् त्रयं - उक्तं सत्पुत्र - कलत्र - सुहृत् - त्रयं,। जगति - संसारे। पुण्यकृतः - पुण्यं कृतवन्तः/ धन्याः। लभन्ते - प्राप्नुवन्ति।

कोशः - 'तातस्तु जनकः पिताः' - अमरः।' आत्मजः तनयः सुतः सूनुः पुत्रः' - अमरः। 'कलत्रं श्रोणिभार्ययोः - अमरः। मित्रं सखा सुहृत् - अमरः।

वृत्तं - वसन्ततिलका

१६) पापान्निवारयति, योजयते हिताय,गुह्यं निगूहति, गुणान्प्रकटीकरोति।
आपद्गतं च न जहाति, ददाति काले, सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥

अन्वयः - पापात् निवारयति, हिताय योजयते, गुह्यं निगूहति, गुणान् प्रकटीकरोति, आपद्गतं च न जहाति, काले ददाति, सन्तः इदं सन्मित्रलक्षणं प्रवदन्ति।

दीका - पापात् - पापाचरणात्। निवारयति - धर्मोपदेशेन दुष्कर्मप्रवृत्तेः वारयति/निवर्तयति। हिताय - सत्कर्माचरणाय/हितकर्मणि। योजयते - प्रवर्तयति। गुह्यं - गोप्यं। निगूहति - आच्छादयति। गुणान् - औदार्यादीन् सद्गुणान्। प्रकटीकरोति - प्रख्यापयति। आपद्गतं - विपद्ग्रस्तं/अतिसंकटस्थं च न। जहाति - त्यजति। काले - व्यसनसमये/सहायावश्यकसमये। ददाति - यथोचितं धनादिकं सहायतां च यच्छति, यद्वाञ्छितं तद्दिशति। सन्तः - सज्जनाः। इदं पापान्निवारणादिकं सर्वं। सन्मित्रलक्षणं - निष्कपटसुहृदः स्वरूपं/चिह्नं। प्रवदन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कोषः - 'चिह्नं लक्ष्म च लक्षणं' – अमरः।

वृत्तं - वसन्ततिलका।

१७) भवन्ति नम्रास्तरवः फलोद्गमैर्नवांबुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥

अन्वयः - तरवः फलोद्गमैः नम्राः भवन्ति, घनाः नवाम्बुभिः दूरविलम्बिनः भवन्ति, सत्पुरुषाः समृद्धिभिः अनुद्धताः भवन्ति। एषः परोपकारिणां स्वभावः एव।

टीका - तरवः - महीरुहाः। फलोद्गमैः - फलानां प्रादुर्भावैः, फलभारैरित्यर्थः। नम्राः - विनम्राः/अधोलम्बिनः/अवनताः। भवन्ति। घनाः - मेघाः/ जलधराः। नवजलागमैः/नूतनैर्जलैः। दूरविलम्बिनः भवन्ति – दूरपर्यन्तं विलम्बन्ते/(भारात्) भूमौ अध आगच्छन्ति । एवं सज्जनाः। समृद्धिभिः - ऐश्वर्यादिभिः। अनुद्धताः - उत्सेकहीनाः/अनुत्सेकिनः/नम्राः। भवन्ति॥ एषः - पूर्वोक्तनम्रत्वव्यवहारः। परोपकारिणां - परहितसम्पादनतत्पराणां।

स्वभावः - एव - निसर्गसिद्ध एव। महान्तः परोपकाररताः स्वक्लेशं न गणयन्ति।

कोशः - 'वृक्षो महीरुहः शाखी विटपः पादपस्तरुः' – अमरः। 'घनजीमूतमुदिरजलमुग्धूमयोनयः' - अमरः।

वृत्तं - वंशस्थवृत्तम्।

१८) पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं,
नोलूकोऽप्यवलोकते यदि दिवा, सूर्यस्य किं दूषणम्।
धारा नैव पतन्ति चातकमुखे, मेघस्य किं दूषणं,
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्वयः - यदा करीरविटपे पत्रं न एव (तर्हि) वसन्तस्य दोषः किम्? यदि उलूकः दिवा अपि न अवलोकते (तर्हि) सूर्यस्य किं दूषणम्? यदि चातकमुखे धाराः नैव पतन्ति (तर्हि) मेघस्य किं दूषणम्? पूर्वम् यत् विधिना ललाटलिखितं तत् मार्जितुं कः क्षमः?

टीका - यदा - यदि, करीरविटपे - करीराख्ये वृक्षे, शाखायां वा। पत्रं - पर्णं। नैव। वसन्तर्तौ भवति। तर्हि । वसन्तस्य - वसन्तर्तोः। दोषः किं? न अस्तीत्यर्थः। यदि। उलूकः - घूकः दिवान्धः, दिवा - दिवसे। अपि न। अवलोकते - पश्यति। सूर्यस्य - भानोः। किं दूषणम्?।यदि। चातकमुखे - चातकाख्य - पक्षिचञ्चां ।धाराः - वर्षाजलानि। न एव। पतन्ति - निपतन्ति। तर्हि। मेघस्य - जलदस्य। किं दूषणम्?। पूर्वं - प्रारम्भे,आदौ। यत्।विधिना - ब्रह्मणा।ललाटे - भालपट्टे/निटिले, लिखितं। तत् मार्जितुं - परिमार्जितुं। कः। क्षमः - समर्थः? न कोऽपीत्यर्थः।

कोशः - 'उलूकस्तु वायसारातिपेचकौ। दिवान्धः कौशिको घूको दिवाभीतो निशाटनः' - अमरः

वृत्तं - शार्दूलविक्रीडितम्

१९) किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः।
किं त्वङ्गीकृतमुत्सृजन् स्वमनसा श्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि किं गोत्रव्रतम्॥

अन्वयः - कूर्मस्य वपुषि किं भरव्यथा न, यत् एष क्ष्मां न क्षिपति किं वा दिनपतेः परिश्रमो न अस्ति यत् निश्चलः न आस्ते। किं तु श्लाघ्यः जनः स्वमनसा अङ्गीकृतम् उत्सृजन् लज्जते। हि प्रतिपन्नवस्तुषु निर्वाहः सताम् एतत् गोत्रव्रतम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

टीका - कूर्मस्य - कमठस्य, कच्छपरूपधारिण: भगवत: विष्णोरित्यर्थ:। वपुषि - शरीरे। भरस्य व्यथा - भारश्रम:। न किम्?। यत् - यद्धेतुना। एष कच्छप:। क्ष्मां - पृथ्वीं। न क्षिपति - स्वशरीरात् न क्षिपति। किं वा दिनपते: - दिनस्य पति:, तस्य, सूर्यस्य। परिश्रम:। निरन्तरं संचरेणापि श्रम: नास्तीत्यर्थ:। यदेष निश्चल: - संचलनहीन: न आस्ते - न तिष्ठति। किं तु। श्लाघ्य: जन: - प्रशस्त: मनुष्य:। स्वमनसा च न तु परप्रेरणया, आत्मना एव। अङ्गीकृतं - स्वीकृतं। उत्सृजन् - त्यजन्। लज्जसे - लज्जां अनुभवति। हि - यतस्तु। प्रतिपन्नेषु वस्तुषु - अङ्गीकृतकार्येषु। निर्वाह: - संपादनं। सतां - सज्जनानां। एतत् गोत्रव्रतं - कुलपरंपराप्राप्त: धर्म: वर्तते।

कोश: - 'क्ष्मा अवनिर्मेदिनी मही' - अमर:।

वृत्तं - शार्दूलविक्रीडितम्।

अलङ्कार: - अर्थान्तरन्यास: तृतीयचरणोक्तसामान्यस्य समर्थनं प्रथमार्धोक्तविशेषाभ्यां क्रियते इत्यनेन अर्थान्तरन्यासालङ्कार:।

२०) क्षुद्रा: सन्ति सहस्रश: स्वभरणव्यापारमात्रोद्यता:
स्वार्थो यस्य परार्थ एव स पुमानेक: सतामग्रणी:।
दुष्पूरोदरपूरणाय पिबति स्रोत:पतिं वाडवो
जीमूतस्तु निदाघसंभृतजगत्संतापविच्छित्तये॥

अन्वय: स्वभरणव्यापारमात्रोद्यता: क्षुद्रा: सहस्रश: सन्ति। परार्थ: एव यस्य स्वार्थ: स सतामग्रणी: पुमान् एक:। वाडव: स्रोत:पतिं दुष्पूरोदरपूरणाय पिबति। जीमूत: तु निदाघसंभृतजगत्संतापविच्छित्तये स्रोत:पतिं पिबति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

टीका - स्वभरणव्यापारमात्रोद्यताः - आत्मपोषणे तत्पराः।क्षुद्राः - पामरजनाः। सहस्रशः - अनेकसंख्याकाः। सन्ति। किन्तु, परार्थः - परहितसंपादनम् एव। यस्य। स्वार्थः - स्वप्रयोजनं। सः नरः। सतां। अग्रणीः - अग्रेसरः। पुमान् एकः - अल्पः/विरलः एव। वाडवः - सामुद्रः अग्निः। स्रोतःपतिं - तं सागरजलं। दुष्पूरोदरपूरणाय - आत्मनः कुक्षेः तृप्त्यै। पिबति। जीमूतः - मेघः तु। निदाघेन - घर्मेण। संभृतः - जनितः। यो जगतः - लोकस्य। संतापस्य विच्छित्तये - तापस्य शान्त्यर्थं/विनाशार्थं। सामुद्रं जलं पिबति।

कोषः - 'और्वस्तु वाडवो वडवानलः' – अमरः। 'निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः' – अमरः।

वृत्तं - शार्दूलविक्रीडितम् ।

२१) भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा,
लोकाः! पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम्।

अन्वयः - लोकाः! पश्यत आखुः नक्तं विवरं कृत्वा भग्नाशस्य करण्डपिण्डिततनोः क्षुधा म्लानेन्द्रियस्य भोगिनः मुखे स्वयम् निपतितः। असौ तत्पिशितेन तृप्तः सन् तेन एव पथा सत्वरं यातः(अतः) हि दैवम् एव नृणां वृद्धौ क्षये (च) कारणं भवति।

टीका - हे लोकाः! - हे जनाः! पश्यत - विलोकयत।आखुः - मूषकः। नक्तं - रात्रौ। विवरं कृत्वा - बिलं विधाय। भग्नाशस्य - भग्नमनोरथस्य। करण्ड - पिण्डित - तनोः - पेटिकायां वलयितं शरीरं यस्य सः, तस्य, विहारप्रसारशून्यतया कृच्छ्रदशामापन्नस्य। अत एव। क्षुधा - बुभुक्षया। म्लानेन्द्रियस्य - निर्बलशरीरस्य।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भोगिनः - उरगस्य। मुखे - आनने। स्वयं - न परप्रयासात्, किन्तु स्वयमेव। निपतितः - प्रविष्टः। असौ सर्पः। तत्पिशितेन - तस्य मांसेन। तृप्तः - खादित्वा तृप्तिं प्राप्तः सन्। तेन एव पथा - मूषकनिर्मितमार्गेणैव। सत्वरं - वेगेन। यातः - बहिर्गतः, पलायितश्च।अतः हि। दैवम् एव - भाग्यमेव। नृणां - नराणां।वृद्धौ - उन्नतौ। क्षये - विनाशे। च। कारणं - हेतुः। भवति।

कोषः - "पिशितं तरसं मांसम्" - अमरः।'उरगः पन्नगो भोगी जिह्मगः पवनाशनः' - अमरः। 'मूषकोऽप्याखुः' - अमरः। 'विवरं बिलम्' - अमरः। 'दैवं दिष्टं भागधेयम्' – अमरः।

- शार्दूलविक्रीडितं वृत्तम्

अर्थान्तरन्यासालङ्कारः

- चतुर्थचरणोक्तस्य सामान्यस्य समर्थनम् आद्यत्रिचरणोक्तेन विशेषेण क्रियते, इति कारणात् अर्थान्तरन्यासालङ्कारः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. कालिदासः महाकविः

महाकविना कालिदासेन रघुवंशः, कुमारसंभवमिति द्वे महाकाव्ये, मालविकाग्निमित्रं, विक्रमोर्वशीयं, शाकुन्तलमिति त्रीणि नाटकानि, मेघदूतमिति सन्देशकाव्यं च रचितानि।

सन्देशकाव्येषु मेघदूतम् इति काव्यरत्नं शिरोभूषणायते। अस्मिन् काव्ये विन्ध्यप्रदेशाद् आकैलासं, यानि यानि प्रकृतिरमणीयकानि तानि सर्वाण्यपि वर्णितानि। केचित् श्लोकाः अधो दत्ताः।

१ कश्चित् कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

अन्वयः - स्वाधिकारात् , प्रमत्तः, कान्ताविरहगुरुणा, वर्षभोग्येण, भर्तुः, शापेन, अस्तङ्गमितमहिमा, कश्चित्, यक्षः, जनकतनयास्नानपुण्य - उदकेषु, स्निग्धच्छायातरुषु, रामगिर्यास्त्रमेषु, वसतिं, चक्रे।

अन्वयार्थः - स्वाधिकारात् - आत्मनियोगात्, प्रमत्तः - अनवहितः, कान्ताविरहगुरुणा - प्रियायाः गुरुणा विरहेण, वर्षभोग्येण - संवत्सर - अनुभवयोग्येन, भर्तुः - स्वामिनः कुबेरस्य, शापेन - निग्रहवचसा, अस्तङ्गमितमहिमा - प्रतिहतमहत्वः/ महत्वहीनं प्राप्तः, कश्चित् - अनिर्दिष्टनामा, यक्षः - देवयोनिविशेषः, जनक - तनया - स्नान - पुण्य - उदकेषु - जनकस्य पुत्र्याः सीतायाः, स्नानैः पवित्राणि जलानि येषु तेषु, स्निग्धच्छायातरुषु - सान्द्राः नमेरुवृक्षाः येषु तेषु, रामगिर्याश्रमेषु - चित्रकूटस्याश्रमेषु, वासं - वसतिं/निवासं, चक्रे - कृतवान्/चकार।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भावार्थः - आत्मनः नियोगे कृतापराधः, कश्चित्यक्षः, स्वामिशापात्, प्रियावियुक्तत्वेन संवत्सरपर्यन्तकालयापनार्थं, जानक्याः स्नानपवित्रजलेषु, प्रचुरनमेरुवृक्षेषु चित्रकूटाश्रमेषु निवासमकरोत्।

व्याकरणविशेषः -

१) अधिक्रियते अस्मिन् इति अधिकारः। अधि - उपसर्गः+कृ धातुः,घञ् प्रत्ययः। अधिकारात् - प्रमादार्थधातुसंयोगे प्रमादविषयस्य अपादानत्वात् पञ्चमी।

२) प्रमत्तः - प्र उपसर्गः, मद् - धातु - क्त प्रत्ययः

३) भोक्तु योग्यः - भोग्यः। वर्षं भोग्यः - वर्षभोग्यः+तेन

४) बिभर्ति इति भर्ता।

५) शापेन - शपनं शापः, हेतोः तृतीया।

६) गमितः - गम् धातुः+णिच्+क्त प्रत्ययः

महत्+इमनिच् प्रत्ययः=महिमन्।

७) विद्याधर - अप्सरो - यक्ष - रक्ष - गन्धर्व - किन्नराः - देवयोनिविशेषाः

८)वस् धातुः + अति प्रत्ययः= वसतिः+तम्

९) चक्रे - कृ धातोः लिट्

१०) छायाप्रधानः तरुः - छायातरुः(मध्यमपदलोपी समासः)

कैलासपर्वते अलकापुरी नाम नगरी, इन्द्रस्य कोशाध्यक्षस्य/कोषाध्यक्षस्य कुबेरस्य राजधानी।

शृङ्गाररसस्य द्वौ भेदौ, सम्भोगो विप्रलम्भश्च। अस्मिन् मेघदूतकाव्ये विप्रलम्भशृङ्गारस्य एव प्राधान्यम्। अत्र प्रवासरूपः विप्रलम्भशृङ्गारः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ब्रह्मवैवर्तपुराणानुसारेण हेममाली नाम यक्षः, प्रतिदिनं शङ्करपूजार्थं प्रातःकाले कुसुमानि आनयति स्म। एकस्मिन् दिने, प्रियभार्यया सह भाषमाणः सः पूजार्थं पुष्पाणि न आनीतवान्। कर्तव्यात् प्रमत्तः इति स्वामिना कुबेरेण शप्तः तस्य प्रवासमकरोत्।

वृत्तं – मन्दाक्रान्ता।

अलङ्कारः - काव्यलिङ्गम् –लक्षणं - 'समर्थनीयस्य अर्थस्य समर्थनम्'। समर्थको हेतुः वाक्यार्थः, पदार्थो वा भवति। अत्र "स्वाधिकारात् प्रमत्तः" इति पदार्थहेतुना प्रियावियोगकारणस्य उक्तिः। शापरूपसमर्थनीयार्थस्य स्वाधिकारात् प्रमत्तत्वरूपसमर्थनं क्रियते इति काव्यलिङ्गम्। छायाप्रधानतरुः - नमेरुः।

२) तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥

अन्वयः - तस्मिन्, अद्रौ, अबलाविप्रयुक्तः, कनकवलयभ्रंशरिक्तप्रकोष्ठः, कामी, सः, कतिचित्, मासान्, नीत्वा आषाढस्य प्रथमदिवसे, आश्लिष्टसानुं, वप्रक्रीडापरिणतगजप्रेक्षणीयं, मेघं, ददर्श ।

प्रतिपदार्थः - तस्मिन् - पूर्वोक्ते, अद्रौ - रामगिरौ/चित्रकूटे इति भावः, अबलाविप्रयुक्तः - प्रियावियोगी, अत एव, कनकवलयभ्रंशरिक्तप्रकोष्ठः - स्वर्णस्य वलयस्य च्युतेन शून्यःमणिबन्धः यस्य सः, कामी - कामुकः, सः - पूर्वोक्तः यक्षः, कतिचित् मासान् - त्रिंशद्दिनसमूहं अष्टौ मासान् इति भावः, नीत्वा - यापयित्वा, आषाढस्य - शुचेः, प्रथमदिवसे - प्रथमदिने, आश्लिष्टसानुं - आक्रान्तः कूटः येन तं,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वप्रक्रीडापरिणतगजप्रेक्षणीयं - उत्खातकेलिषु तिर्यग्दन्तप्रहारहस्तिमिव प्रेक्षितुं योग्यं, मेघं - बलाहकं/जलदं, ददर्श - दृष्टवान्।

भावार्थः - पूर्वोक्तचित्रकूटे कान्तावियोगदौर्बल्येन च्युत - स्वर्णकटकः, कामुकः / अभिलाषयुक्तः सः यक्षः, अष्टौ मासान् यापयित्वा आषाढमासस्य प्रथमदिने, आक्रान्तकूटं, उत्खातकेलिषु तिर्यग्दन्तप्रहारगजमिव प्रेक्षणीयं मेघमपश्यत्।

व्याकरणविशेषाः

१)अविद्यमानं बलं यस्याः सा - अबला, अबलया विप्रयुक्तः

२) वि + युज् + क्त प्रत्ययः= विप्रयुक्तः

३) कामयते तच्छीलः= कामी, काम+इनिच् प्रत्ययः= कामिन्

४) नी + क्त्वा प्रत्ययः= नीत्वा

५) आषाढया(नक्षत्रेण) युक्ता पौर्णमासी= आषाढी, आषाढी पौर्णमासी अस्मिन् इति आषाढः। आषाढा+अण्+ङीप्= अषाढी

६) आश्लिष्टः(आ + श्लिष् + क्त प्रत्ययः) सानुः येन + तम्। आश्लिष्टः सानुर्येन सः

७) प्र + ईक्ष् + अनीयर् प्रत्ययः= प्रेक्षणीयः, प्रेक्षितुं योग्यः।

८) कनकस्य वलयः, कनकवलयस्य भ्रंशः, भ्रंशेन रिक्तः प्रकोष्ठ।

९) वप्रे क्रीडा(उत्खातकेलिः शृङ्गाद्यैर्वप्रक्रीडा), वप्रक्रीडासु परिणतः, स च असौ गजः - वप्रक्रीडापरिणतगजः।

१०) दृश्(पश्य्) धातोः लिट् – ददर्श ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उपमालङ्कारः

'उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः'। उपमायाः चत्वारः अवयवाः सन्ति। १) उपमानम्, २) उपमेयम्, ३) साधारणधर्मः, ४) उपमावाचकः। एतेषां चतुर्णां मध्ये एकस्य, द्वयोस्त्रयाणां वा अनुपादानात् लुप्तोपमा भवति। अत्र वप्रक्रीडागज इव प्रेक्षणीयमिति वक्तव्ये, समस्तपदत्वात् 'इव' इति पदस्य लोपः भवति। अतः अत्र उपमावाचकलुप्तोपमालङ्कारः।

३) प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥

अन्वयः - सः, नभसि, प्रत्यासन्ने(सति) , दयिताजीवितालम्बनार्थी(सन्), जीमूतेन, स्वकुशलमयीं, प्रवृत्तिं, हारयिष्यन्, प्रत्यग्रैः, कुटजकुसुमैः, कल्पितार्घाय, तस्मै, प्रीतः (सन्), प्रीतिप्रमुखवचनं, स्वागतं व्याजहार ।

प्रतिपदार्थः - सः - प्रियाचिन्तकः यक्षः, नभसि - श्रावणे, प्रत्यासन्ने - निकटवर्तिनि (सति)/आषाढस्य समीपं प्राप्ते सति इति, दयिताजीवितालम्बनार्थी - प्रियायाः प्राणधारणेच्छुकः सन्, जीमूतेन - मेघेन, स्वकुशलमयीं - निजक्षेमप्रधानां, प्रवृत्तिं - वार्तां, हारयिष्यन् - प्रापयिष्यन् । प्रत्यग्रैः - नवीनैः/ नूतनैः, कुटजकुसुमैः - गिरिमल्लिकापुष्पैः, कल्पितार्घाय - अनुष्ठिता पूजा यस्मै सः,तस्मै, तस्मै - जीमूताय/मेघाय, प्रीतः - प्रसन्नतापूर्वकः, प्रीतिमुखवचनं - प्रणयप्रधानभाषितं,यथा स्यात् तथा स्वागतं - स्वागतवचनं/कुशलागमनं, व्याजहार - पप्रच्छ/पृष्टवान्/जगाद ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भावार्थः - प्रियाचिन्तकः सः यक्षः, श्रावणमासे निकटवर्तिनि सति, प्रियायाः प्राणधारणोपायं कर्तुम् अभिलषन् मेघद्वारा स्वस्य कुशलवार्तां दयितासमीपे प्रापयिष्यन्, नवीनैः गिरिमल्लिकापुष्पैः, तं मेघं पूजयित्वा प्रणयप्रधानवचनम् उक्त्वा प्रसन्नतापूर्वकः स्वागतं जगाद।

व्याकरणविशेषाः

१) प्रति+आङ्+सद्+क्तः,(कर्तरि),तस्मिन्=प्रत्यासन्ने

२) आङ्+लबि +ल्युट् प्रत्ययः = आलम्बनम्। जीवनं-जीवितं, दयितायाः जीवितं, तस्य आलम्बनं, दयिताजीवितालम्बनम् अर्थयते तच्छीलः,दयिताजीवितालम्बनार्थी। अत्र "उपपदमतिङ्" इति सूत्रानुसारेण उपपदसमासः।

३) जीवनस्य मूतः - जीमूतः

४) हृञ् + णिच् + लृट्+शतृ प्रत्ययः - हारयिष्यन्

५) प्रीञ्+ क्तः - प्रीतः

६) प्रीणनं प्रीतिः, प्रीञ्+क्तिन् प्रत्ययः,"स्त्रियां क्तिन्" इति स्त्रीलिङ्गपदम्

७) शोभनम् आगतं= स्वागतं, "कुगति प्रादयः" इति समासः

८) वि+आङ्+हृञ्+लिट् – व्याजहार।

९) स्वस्य कुशलं, प्रचुरं स्वकुशलं यस्यां स्वकुशलमयी,ताम्।

४) जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्वयः - (हे मेघ!)त्वां, भुवनविदिते, पुष्करावर्तकानां वंशे, जातं, कामरूपं, मघोनः, प्रकृतिपुरुषं, जानामि, तेन, विधिवशात्, दूरबन्धुः, अहं, त्वयि, अर्थित्वं, गतः, अधिगुणे, याञ्चा, मोघा, अपि, वरं, अधमे, लब्धकामा, अपि, न(वरम्) ।

प्रतिपदार्थः - (हे मेघ! - हे जलद!) त्वां - भवन्तं, भुवनविदिते - जगत्सु विदिते, पुष्कर - आवर्तकानां - पुष्करम् आवर्तकम् इति नामधेयानां प्रलयकालमेघानां, वंशे - कुले, जातं - उत्पन्नं, कामरूपं - इच्छानुसारीरूपं, मघोनः - देवेन्द्रस्य, प्रकृतिपुरुषं - पौरवर्गे प्रधानपुरुषं, जानामि - वेद्मि, तेन - महावंशोत्पन्नत्वकारणेन, विधिवशात् - शापरूपविधेः वशंप्राप्तः इति कारणात्, दूरबन्धुः - पत्न्याः वियुक्तः/वियुक्तपत्नीकः, अहं - यक्षः, त्वयि - भवति, अर्थित्वं - याचकत्वं, गतः - (त्वां) उपस्थितः/(त्वयि)प्राप्तः, अधिगुणे - अधिकगुणपुरुषविषये, याञ्चा - याचनं/याचना, मोघा अपि - व्यर्थं/निष्फला अपि, वरं - दातुः गुणसम्पन्नत्वात्प्रियं, किन्तु याञ्चावैफल्यत्वात् ईषत्प्रियत्वमित्यर्थः, एतद्वैपरीत्येन, अधमे - गुणविहीनपुरुषविषये, लब्धकामा - फलयुक्ताभिलाषा अपि याञ्चा, न(वरं) - किञ्चिदपि न प्रिया।

भावार्थः - हे जलद! यक्षः अहं, जगत्प्रसिद्धे पुष्करावर्तकनां कुले उत्पन्नम् इच्छाधीनरूपिणं त्वाम् इन्द्रस्य प्रधानपुरुषत्वेन जानामि। अतः भाग्यहीनः पत्नीवियुक्तः अहं, त्वां याचे। अधिकगुणपुरुषे याचना निष्फला अपि उचितैव, एतद्वैपरीत्येने गुणहीने अधमे, सा याचना फलयुक्ता अपि, ईषदपि न प्रिया।

व्याकरणविशेषाः

१) पुष्करं नाम मेघाः, जलम् आवर्तयन्तीति पुष्करावर्तकाः।

आङ्+वृत् +ण्वुल् प्रत्ययः=आवर्तयति

२) जनि +क्तः= जातम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३) ज्ञा +लट्+मिप् = जानामि

४) बध्नाति मन: स्नेहादिना इति बन्धु:, दूरे बन्धु: यस्य स:

५) याचनं - याञ्ञा

६) लब्धकामा - लब्ध: काम: यया सा, तृतीया बहु.व्री.।

अलङ्कार: - अर्थान्तरन्यास: अलङ्कार: - लक्षणं - 'सामान्यविशेषयो: उक्ति:'।अस्मिन् श्लोके 'याञ्ञा मोघा वरमधिगुणे नाधमे लब्धकामा' इति चतुर्थचरणस्थ सामान्यार्थद्वारा अर्थित्वगमनरूपविशेषार्थस्य समर्थनमिति अर्थान्तरन्यास: अलङ्कार:।

५. सन्तप्तानां त्वमसि शरणं तत्पयोद! प्रियाया:
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥

अन्वय: - हे पयोद! त्वं सन्तप्तानां शरणम् असि, तत् धनपतिक्रोधविश्लेषितस्य मे सन्देशं प्रियाया: हर । बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या अलका नाम यक्षेश्वराणां वसति: ते गन्तव्या।

प्रतिपदार्थ: - हे पयोद! - हे मेघ!, त्वं, सन्तप्तानां - आतपेन अभीष्टजनवियोगेन वा सन्तापयुक्तानां/संज्वरितानां, शरणं - जलदानेन स्वस्थानप्रेरणया वा रक्षक:, असि। तत् - शरणत्वात् कारणात्, धनपति - क्रोध - विश्लेषितस्य - स्वस्वामिन: कुबेरस्य कोपात् कान्ताया: वियुक्तस्य, मे - मम, सन्देशं - वार्तां, प्रियाया: - कान्ताया: समीपं, हर - नय/प्रापय, बाह्य - उद्यान - स्थित - हर - शिरश्चन्द्रिका - धौत - हर्म्या - अलकाया: बहि: उद्याने विद्यमानस्य शिवस्य मूर्ध्नि या ज्योत्स्ना,तया प्रक्षालितानि धनिकभवनानि यस्यां सा, अलका - अलका इति नाम्ना

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रसिद्धा नगरी, यक्षेश्वराणां - गुह्यकश्रेष्ठानां, वसतिः - वासस्थानं, ते - भवता, गन्तव्या - यातव्या।

भावार्थः - हे मेघ! त्वम् आतपेन अभीष्टजनवियोगेन वा संज्वरितानां,रक्षकःअसि इति कारणात् कुबेरशापवशात्, प्रियावियुक्तस्य मम, सन्देशं प्रियासमीपं प्रापय। अलकापुर्याः बहिरुद्यानस्थितशङ्करमूर्ध्नि स्थितचन्द्रिकया उज्ज्वलहर्म्या यक्षराजधानी, अलका इति प्रसिद्धा पुरी त्वया गन्तव्या।

व्याकरणविशेषाः

१) पयो ददाति इति पयोदः

२) सं+तप् +क्तः= सन्तप्तः

३) वि+श्लिष् +णिच्+क्तः= विश्लेषितः

४) प्रीणाति इति प्रिया, प्रीञ्+कप्रत्ययः+टाप् प्रत्ययः=प्रिया

५) हृञ्+लोट्= हर

६) चन्द्रिका, तया धौतानि हर्म्याणि यस्यां सा – चन्द्रिकाधौतहर्म्या

६) अलति(भूषयति) इति अलका, अल +कुन् प्रत्ययः+टाप् प्रत्ययः =अलकापुरी

७) बहिर्भवं बाह्यम्

८) ते गन्तव्या –कृत्प्रत्ययान्तशब्दस्य योगे 'कृत्यानां कर्तरि वा' इति सूत्रानुसारेण विकल्पेन षष्ठी।

उत्तरदिशः अधिपतिः कुबेरः, तस्य वासस्थानम् अलकापुरी।

'शरणं गृहरक्षित्रोः' – अमरः। 'हर्म्यादि धनिनां वासः' – अमरः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६ त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः॥

अन्वयः - पवनपदवीम् आरूढं त्वां पथिकवनिताः प्रत्ययात् आश्वसत्यः उद्गृहीत - अलकान्ताः(सत्यः) प्रेक्षिष्यन्ते। त्वयि सन्नद्धे(सति) अहम् इव यो जनः पराधीनवृत्तिः न स्यात्, (सः)कः अन्यः विरहविधुरां जायाम् उपेक्षेत।

प्रतिपदार्थः - (हे मेघ!) पवनपदवीं - वायुमार्गं नभः, आरूढं - प्राप्तम्,आकाशचारिणं, त्वां - भवन्तं, पथिकवनिताः - प्रोषितभर्तृकाः पान्थस्त्रियः, प्रत्ययात् - प्रियाऽऽगमन - विश्वासात्, आश्वसत्यः - विश्वसिताः, उद्गृहीत - अलक - अन्ताः - दृष्टिप्रसारार्थम् उन्नमय्य, धृतानामलकानामग्राः (सत्यः), प्रेक्षिष्यन्ते - उत्कण्ठातिशयेन द्रक्ष्यन्ति/विलोकयिष्यन्ति। त्वयि - मेघे, सन्नद्धे - व्यापृते(सति), अहम् इव - मत्सदृशः, यः जनः - यन्नरः, पराधीनवृत्तिः - परवशेन जीवनं यस्य सः/अन्यायत्तजीवनः, न स्यात् - न भवेत्, कः अन्यः - कतमः अपरजनः, विरहविधुरां - पतिवियोगदुर्बलां, जायां - भार्याम्, उपेक्षेत - उपेक्षां कुर्यात्।

भावार्थः - हे मेघ! नभश्चारिणं त्वां, प्रोषितभर्तृकाः नार्यः, मत्प्रियः आगमिष्यतीति विश्वासात्,अलकाग्राणि दृष्टिप्रसारार्थम् उन्नमय्य द्रक्ष्यन्ति। मेघागमनसमये, मादृशात् परवशाद् जनात् ऋते, कोऽपि अपरः जनः भर्तावियोगदुर्बलां भार्यां नोपेक्षेत।

व्याकरणविशेषाः

१) आङ्+रुह् +क्त= आरूढम्

२) पन्थानं गच्छतीति पथिकः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३) आश्वसन्ति इति आश्वसत्यः, आङ्+श्वस् + शतृ प्रत्ययः + ङीप् (स्त्री प्रत्ययः)

४) सं+नह्+क्त = सन्नद्धे

५) वर्तनं वृत्तिः, वृत्+क्तिन्। पराधीना वृत्तिः यस्य सः

६) विगता धूः यस्या सा ; विरहेण विधुरा – विरहविधुरा

७) जायते अस्यामिति जाया

८) उप+ईक्ष्+विधिलिङ् =उपेक्षेत

९) प्र+वस्+क्त=प्रोषित, प्रोषितः भर्ता यस्याः सा – प्रोषितभर्तृकः

'अध्वनीनोऽध्वगूऽध्वन्यः पान्थः पथिकः इत्यपि' - अमरः।

'अलकाश्चूर्णकुन्तलाः' - अमरः

अलङ्कारः - अत्र चतुर्थचरणस्थ 'मेघदर्शने कोऽपि भार्यां न उपेक्षते' इति सामान्यार्थद्वारा 'मामिव पराधीनवृत्तिः एव भार्यामुपेक्षते' इति विशेषार्थस्य समर्थनमिति" अर्थान्तरन्यासः।

७. कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।
आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः॥

अन्वयः - यत् महीम् उच्छिलीन्ध्राम् अवन्ध्यां च कर्तुं प्रभवति तत् श्रवणसुभगं ते गर्जितं श्रुत्वा मानसोत्काः बिसकिसलयच्छेदपाथेयवन्तः राजहंसाः नभसि आ कैलासाद् भवतः सहायाः संपत्स्यन्ते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रतिपदार्थाः - यत् - जलदगर्जितं, महीं - भूमिं, उच्छिलीन्ध्रां - उद्गतां शिलीन्ध्रां/कदल्याम्, अवन्ध्यां च - सफलां, कर्तुं - विधातुं, प्रभवति - शक्नोति। तत् - इत्थं/तादृशं, श्रवणसुभगं - श्रोत्रसुखं, ते - भवतः, गर्जितं - स्तनितं, श्रुत्वा - आकर्ण्य, मानसोत्काः - मानससरोवरगमनोत्कण्ठायुक्ताः, अत एव, बिस - किसलय - च्छेद - पाथेयवन्तः - खादितुं मृणाल - अग्रभाग - खण्डानि गृहीत्वा, राजहंसाः - चञ्चुचरणलोहिताः सिताः हंसानां राजानः, नभसि - खे/आकाशे, आ कैलासात् - कैलासपर्वतपर्यन्तं, भवतः - त्वदीयाः, सहायाः - सहचराः, संपत्स्यन्ते - भविष्यन्ति।

भावार्थः - हे मेघ! जगतः कर्णसुखहेतुः यत्ते तव गर्जनं, भूमिं शिलीन्ध्रातपत्रां सफलां च करोति/विदधाति। तव गर्जनमाकर्ण्य मार्गभोजनार्थं मृणालाग्रखण्डानि संकलय्य, राजहंसाः मानसरोवरं प्रति गन्तुमुत्सुकाः नभसि रामगिरितः कैलासपर्वतपर्यन्तं, त्वदीयाः सहचराः भविष्यन्ति।

व्याकरणविशेषाः

१) उच्छिलीन्ध्रां= उद्गतानि शिलीन्ध्राणि यस्यां सा+तां

शिलीन्ध्रः - Mushroom

२) न वन्ध्या= अवन्ध्या,

४) प्र+भू/भव+लट्(तिप्)= प्रभवति

५) श्रूयते आभ्यामिति श्रवणे, करणार्थे ल्युट्

श्रुतिः स्त्री श्रवणं श्रवः - इत्यमरः।

६) गर्जनं गर्जितं, तत्।

७) उद्+कन् प्रत्ययः=उत्क(निपातनं) उन्मनाः। मानसे उत्काः। कैलासे ब्रह्मणा मनसा निर्मितं सरः मानसः , सरस्सु वरमिति सरोवरम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वर्षासमये मेघश्यामां दिशं दृष्ट्वा राजहंसाः मानसं यान्ति। राजहंसानां वासस्थानं/उत्पत्तिस्थानं मानससरः।

८) बिसानां किसलयानि, तेषां छेदाः। पथि साधु पाथेयम्। पाथेयमस्ति एषां ते - पाथेयवन्तः। बिसकिसलयच्छेदैः पाथेयवन्तः

९) हंसानां राजानः = राजहंसाः। 'राजदन्तादिषु परम्' इतिसूत्रानुसारेण 'राजन्' पदस्य पूर्वप्रयोगः

१०) सं + पद् + लृट् = सम्पत्स्यन्ते।

८. आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम्॥

अन्वयः - प्रियसखं तुङ्गं पुंसां वन्द्यैः रघुपतिपदैः मेखालासु अङ्कितम् अमुं शैलम् आलिङ्ग्य आपृच्छस्व। काले काले भवतः संयोगम् एत्य चिरविरहजम् उष्णं बाष्पं मुञ्चतः यस्य स्नेहव्यक्तिः भवति ।

प्रतिपदार्थाः - प्रियसखं - अभीष्टमित्रं/प्रियसुहृत्, तुङ्गं - उच्चं/उन्नतं, पुंसां - जनानां/मनुष्याणां, वन्द्यैः - अभिवादनयोग्यैः/आराधनीयैः, रघुपतिपदैः - रघुवंशरामस्य चरणयोः न्यासैः, मेखलासु - पर्वतस्य मध्यप्रदेशेषु, अङ्कितं - चिह्नितं, अमुं - रामगिरि/चित्रकूटम् इति, शैलं - अद्रिं, आलिङ्ग्य - आश्लिष्य, आपृच्छस्व - तव यात्रार्थं 'महाभाग! गच्छाम्यहं' इत्यामन्त्रणेन आनन्दय, काले काले - वर्षाकाले,प्रतिवर्षाकालं, भवतः - मेघस्य तव, संयोगं - संपर्कम्, एत्य - प्राप्य, चिरविरहजं - चिरकालविरहोत्पन्नम्, उष्णं - अशीतलं, बाष्पं - नयनजलं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऊष्माणं वा, मुञ्चतः - त्यजतः, यस्य - रामगिरेः, स्नेहव्यक्तिः - प्रेम्णः आविर्भावः, भवति - वर्तते।

भावार्थः - हे मेघ! लोकानाम् अभिवादनीयैः,श्रीरामचरणन्यासैः, पर्वतस्य मध्यभागे चिह्नितम्, उन्नतं रामगिरिर्नाम प्रियमित्रम् आलिङ्ग्य, तव यात्रार्थं अनुज्ञाप्रश्नेन आनन्दय। प्रतिवर्षाकालं सुहृदः भवतः समागमसुखमनुभूय, उष्णबाष्पं त्यजतः रामगिरेः प्रणयः प्रादुर्भवति।

व्याकरणं -

१) प्रियः च असौ सखा च - प्रियसखः+तं, 'राजाऽहः सखिभ्यष्टच्' इति सूत्रानुसारेण 'सखि' शब्दस्य समासान्ते टच् प्रत्ययः। अतः सखि - →सख

२) वन्दितुं योग्यानि+तैः= वन्द्यैः, वदि(वन्द्)+ण्यत्

३) रघूणां पतिः, रघोः अपत्यार्थत्वात् रघूणामिति ब.व.। 'पतिः समास एव' इति 'पति' शब्दस्य घिसंज्ञाप्राप्तिः, अतः 'रघुपति' शब्दः 'हरि' शब्दवत्

४) आ+लिगि(लिङ्ग्)+क्त्वा(ल्यप्)= आलिङ्ग्य

५) आ+ज्ञानार्थक पृच्छ् धातुः+लोट् = आपृच्छस्व , 'आनन्दन - सभाजने आप्रच्छन्नम्' - अमरः। 'आङि नुपृच्छ्योरुपसंख्यानम्' इति सूत्रानुसारेण आत्मनेपदम्।

६) चिरं विरहः, चिरविरहः, 'कालाऽध्वनोरत्यन्तसंयोगे' इति सूत्राणुसारेण अत्र् चिर इत्यस्य चिरमिति द्वितीया विभक्तिः

७) बाष्पं –'बाष्पो नेत्रजलोष्मणोः' इति विश्वः

८) मुञ्चतीति मुञ्चन् तस्य=मुञ्चतः, मुच्+शतृ

९) स्निह्+भावे घञ्= स्नेहः, व्यञ्जनं व्यक्तिः, वि+अञ्ज्+क्तिन्= व्यक्तिः, स्नेहस्य व्यक्तिः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

९. मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद! श्रोष्यसि श्रोत्रपेयम्।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥

अन्वयः - हे जलद! तावत् कथयतः (मत्तः) त्वत्प्रयाणानुरूपं मार्गं श्रृणु, तदनु श्रोत्रपेयं मे सन्देशं श्रोष्यसि। यत्र खिन्नः खिन्नः शिखरिषु पदं न्यस्य क्षीणः क्षीण(सन्), स्रोतसां परिलघु पयश्च उपभुज्य गन्तासि।

प्रतिपदार्थः - हे जलद - हे मेघ!, तावत् - इदानीं, कथयतः - वदतः, मत्तः, त्वत्प्रयाण - अनुरूपं - इतः प्रस्थानस्य भवतः, अनुकूलं, मार्गं - पन्थानं, श्रृणु - आकर्णय, तदनु - वर्त्मश्रवणानन्तरं, श्रोत्रपेयं - अतिशयेन श्रवणीयं, मे, सन्देशं - वार्तां/वाचिकं, श्रोष्यसि - आकर्णयिष्यसि, यत्र - पथि, खिन्नः खिन्नः - अभीक्ष्णं क्षीणशक्तिः सन्, शिखरिषु - पर्वतेषु, पदं - चरणं, न्यस्य - निक्षिप्य, क्षीणः क्षीणः - अभीक्ष्णं कृशशरीरः सन्, स्रोतसां - पर्वतनदीप्रवाहाणां, परिलघु - परितः लघु/गुरुत्वदोषरहितं, पयः च - वारि च, उपभुज्य - उपयुज्य, गन्तासि - गमिष्यसि।

भावार्थः - हे मेघ! प्रथमं वदतः मत्सकाशात् स्वप्रस्थानानुकूलं मार्गमाकर्ण्य तदनन्तरं, तृष्णातिशयेन श्रोत्रसुखोत्पादकं मदीयसन्देशं श्रोष्यामि। यस्मिन् मार्गे त्वं गमनायासेन परिश्रान्तिमनुभूय क्षीणशक्तिः सन्, पर्वतेषु चरणन्यासं कृत्वा/विधाय अतिकृशः भूत्वा गिरिनदीप्रवाहाणां जलमुपयुज्य गमिष्यसि।

व्याकरणं -

१) जलं ददाति इति जलदः - उपपदसमासः

२) कथ्+णिच्+लट् शतृ प्रत्ययः, कथयन्+ङस्, अपादाने पञ्चमी, कथयतः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३) प्र+या+ल्युट्=प्रयाणं, तव प्रयाणं, 'प्रत्यययोत्तरपदयोश्च्' इति सूत्रानुसारेण त्वत् आदेशः, त्वत्प्रयाणस्य अनुरूपं= त्वत्प्रयाणाऽनुरूपम्

४) श्रूयते आभ्यां ते - श्रोत्रे, श्रु+ष्ट्रन् प्रत्ययः - श्रोत्रं, पातुम् योग्यः - पेयः, पानार्थक पा धातुः+यत् प्रत्ययः,'ईद्यति' इति सूत्रानुसारेण पा इत्यस्य आकारस्य ईकारः= पेय, श्रोत्राभ्यां पेयः+ तं= श्रोत्रपेयम्

५) सं+ दिश्+घञ् प्रत्ययः= सन्देशः,तम्

६) श्रु+ लृट्+ सिप्= श्रोष्यसि

७) शिखराणि सन्ति येषु – शिखरिन् + तेषु –शिखरिषु, शिखर+इनिच्=शिखरी

८) नि+ अस्+ क्त्वा(ल्यप्)= न्यस्य, क्षयाऽर्थक क्षि+क्त, 'क्षियो दीर्घाय्' इतिदीर्घः, क्षीणः

९) परितः लघु= परिलघु

१०) उप्+ भुज्+ क्त्वा(ल्यप्)= उपभुज्य

११) गं+ लुट्+ सिप्= गन्तासि।

अलङ्कारः - 'प्रस्तुते अप्रस्तुतस्य परिस्फूर्तिः - समासोक्तिः'। अत्र प्रस्तुते मेघे, अप्रस्तुतस्य सामान्यपथिकस्य व्यवहारस्य समारोपणेन अत्र समासोक्त्यलङ्कारः।

१०) अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिः
दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्वयः - पवनः अद्रेः शृङ्गं हरति किंस्वित्? इति उन्मुखीभिः मुग्धसिद्धाङ्गनाभिः चकितचकितं दृष्टोत्साहः (सन्) सरसनिचुलात् अस्मात् स्थानात् पथि, दिङ्नागानं स्थूल - हस्त - अवलेपान् परिहरन् उदङ्मुखः (सन्) खं उत्पत।

अन्वयार्थः - (हे मेघ!) पवनः - वातः, अद्रेः - अचलस्य, शृङ्गं - शिखरं, हरति किंस्वित् – नयति किं?,इति –इत्थं शङ्कया, उन्मुखीभिः - उन्नतवदनाभिः, मुग्धसिद्धाङ्गनाभिः - मुग्ध - सिद्ध - सुन्दरीभिः, चकित चकितं - साश्चर्यं यथा स्यात् तथा, दृष्ट् - उत्साहः - विलोकित - उद्योगः(सन्)दृष्टः उत्साहः यस्य सः, सरसनिचुलात् - आर्द्रस्थल - वेतसात्/वानीरात् सरसा निचुला यस्मिन् तत्, तस्मात्, अस्मात् - एतस्मात्, स्थानात् - रामगिर्याश्रमात्, पथि - आकाशमार्गे, दिङ्नागानां - दिग्गजानां,दिशां नागाः,तेषां, स्थूल - हस्त - अवलेपान् - पीवर - शुण्डानाम् आक्षेपान्, परिहरन् - परित्यजन्, उदङ्मुखः - उत्तराभिमुखः(उदक् मुखं यस्य सः) सन्, खं - नभः/आकाशं, उत्पत - उद्गच्छ।

भावार्थः - हे मेघ! अतिवेगेन गच्छतः तव उत्साहं वीक्ष्य 'वायुः गिरिशिखरं हरति किम्?' इति निन्दितवत्यः मूढाः सिद्धसुन्दर्यः, आश्चर्ययुक्ताः भविष्यन्ति। आर्द्रस्थलवानीराद् एतस्मात्, रामगिर्याश्रमात् नभोमार्गे, प्रतिरोधकानां दिग्गजानां, स्थूलशुण्डादण्डाक्रमणानि परित्यजन्, अलकागमनमार्गम्, उत्तराभिमुखत्वेन, आकाशमुत्पत।

व्याकरणम् -

१) किं +स्वित् –द्वयोः अव्ययोःसंयोगः - किंस्वित्

२) उन्नतं मुखं यासां ताः= उन्मुख्यः,स्त्रीत्वविवक्षया ङीष् प्रत्ययः - उन्मुखी,

३) दृष्टः उत्साहः यस्य सः= दृष्टोत्साहः, दृश्/पश्य्+ क्त=दृष्टः

४) स्था+ ल्युट्= स्थानम्+ तस्मात्= स्थानात्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५) दिशां नागा:+ तेषां= दिङ्नागानाम्

६) स्थूला: च ते हस्ता:, तेषां अवलेपा:,तान्= स्थूलहस्तावलेपान्

७) परि+हृ/हर+लट्(शतृ) - परिहरन्

९) उदक् मुखं यस्य स:= उदङ्मुख:

१०) उत्+पत्+लोट् = उत्पत।

आकाशे उत्पतन् मेघ: यक्षसन्देशं आहरन् कुबेरराजधानीम् अलकापुरीं प्रति गन्तुमारभत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. कविप्रशंसा।

मगधेषु सुमतिः नाम राजा, स्वयं कविः, कविश्रेष्ठान् सादरं सम्मानयन्, प्रथितः बभूव। तस्य सभायां सोमशेखरः आस्थानकविः विराजमानः आसीत्। तस्य मित्रं रवीन्द्रः चाटुश्लोकेषु अतीव पटुः। परन्तु स राजसभां नैवागच्छत् । यदा यदा सोमशेखरः तं रवीन्द्रं, राजसभामानेतुं प्रयतते, तदा तदा रवीन्द्रः मनुस्मृतिश्लोकमेकम् उदाहरति स्म । रवीन्द्रः अर्थेषु निस्पृहः।

मनुस्मृतिः भागः ४.श्लोकः.३.

"यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः।
अक्लेशेन शरीरस्य कुर्वीत धनसंचयम्॥"

निर्धनं खिन्नं रवीन्द्रं विलोक्य तं राजसभामागन्तुं, प्रार्थयामास सोमशेखरः। रवीन्द्रः अपि एकदा राजसभाम् अगात् । तस्मिन्नेव दिने अन्यकार्यगौरवात्, चिन्तापरिश्रमः राजा रवीन्द्रे उदासीनः अभवत् । राज्ञः उदासीनेन अवमानितः इव बहिरागत्य श्लोकमेकं विलिख्य, द्वारस्थहस्ते दत्त्वा, गृहमगात्। अन्यापदेशरीत्या एवं श्लोकं आसीत्।

"स्थूलतया नीलतया दूरतया दानलोलुभैःमधुपैः।
धावितं इभराजधिया हन्त असौ अन्ततः महिषः"॥

राजा श्लोकं सभायामपठत् । सर्वे कवयः राज्ञः कीदृशप्रतिक्रिया भवेदिति चिन्तयन्तः आसन् । राजा रवीन्द्रं दूतैरानाय्य विशेषपारितोषिकं दत्वा श्लोकमेकं विलिख्य ददौ -

"साधारणतरुबुद्ध्या न कल्पितः आलवालोऽपि।
सञ्जातपुष्पमधुना हन्त विजानामि चम्पकतरुं त्वाम्॥" ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

6. कादम्बरी

एषः ग्रन्थः महाकविश्रीबाणभट्टविरचितः अस्ति। बाणभट्टस्य पिता चित्रभानुः, माता राजदेवी। अस्य गुरुः भत्सुः। अस्य पुत्रः भूषणभट्टः। कविः वात्सायनगोत्रोत्पन्नस्य कुबेरस्य प्रपौत्रः। विन्ध्यप्रदेशे शोणानदीतीरस्थः प्रीथिकूटनाम ग्रामः अस्य निवासस्थानम्। अस्य मित्रं भाषाकविः ईशानः। अयं महाकविः कान्यकुब्जायाः अधिपतेः शिलादित्यहर्षबर्धनस्य सभाकविः आसीत्। अस्य राज्ञः कालः खीष्टब्द - ६०६ - ६४७ । कादम्बर्याः पूर्वभागं कविना विरचितम्, उत्तरभागं तु अस्य पुत्रः भूषणभट्टः 'पुलिन्द' इति सङ्केतनाम्ना पूर्तिं कृतवानिति प्रथा।

बाणभट्टकृतयः १) हर्षचरितम् – आख्यायिका। २) कादम्बरी - गद्यकाव्यं/कथा ३) पार्वतीपरिणयः - नाटकम्। ४) मुकुटताडिकनाटकम् । ५) चण्डीशतकं - स्तुतिरूपनाटकम्।

कादम्बर्याः कथासारः ।

वेत्रवतीनद्याः परिगतायां विधिशा इत्यभिधाननगर्यां, शूद्रको नाम राजा पालयन्नासीत्। सः नवे वयसि वर्तमानः अपि ,वनितासम्भोगसुखपराङ्मुखः, सुहृत्परिवृतः, सङ्गीत - मृगयादिव्यापारेषु रतः सन्, कालम् अयापयत्। एकस्मिन् दिने, प्रातः आस्थानमण्डपं गतः। काचित्चाण्डालकन्यका पञ्जरस्थमेकं शुकं, तस्य पुरतः निधाय, अपससार। विदितकलाशास्त्रार्थो नैकविधविषयविचक्षणो, वैशम्पायननामकः सः शुकः स्वदक्षिणं चरणमुन्नम्य स्पष्टवर्णनया गिरा, कृतजयशब्दः, राजानमुद्दिश्य इमाम् आर्याम् पठितवान् –

" स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ॥ "

राजा तु तां श्रुत्वा परमं विस्मयमापन्नः तं शुकमानाय्य तस्य आदितः समस्तं वृत्तान्तं पप्रच्छ। ततश्च शुकः मुहूर्तमिव ध्यात्वा सादरमब्रवीत् – 'अस्ति मुनिजनसेविता पवित्रा विन्ध्याटवी नाम। तत्र गोदावरी नाम्ना सरिता परिगतं महामुनेः अगस्त्यस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आश्रमपदमासीत्। अगस्त्याश्रमस्थानस्य निकट एव पम्पा अभिधानं पद्मसरः। सरसः पश्चिमे तीरे महान् शाल्मलीवृक्षः .....

शाल्मलीतरुवर्णनम् ।

तस्य एवंविधस्य सरसः (पद्मपरिपूर्णकासारस्य), पश्चिमे (पश्चिमदिग्वर्तिनि) तीरे। राघव - शर - प्रहार - जर्जरित - बालतरु - खण्डस्य च समीपे (रामबाणानाम् उपघातेन विदारितः ह्रीवेरवृक्षविशेषाणाम्, अन्यसामान्यवृक्षाणां समूहस्य निकटे)

दिग्गजकरदण्डानुकारिणा जरदजगरेण सततमावेष्टितमूलतया बद्धमहालवाल इव (दिक्षु स्थितः गजः, ऐरावतादिः दिग्गजाः,'ऐरावतः पुण्डरीको वामनः कुमुदः अञ्जनः पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः', दिग्गजशुण्डादण्डसदृशेन, दीर्घेण, जीर्णेन वाहसेन(अजगरे शयुर्वाहस इत्युभौ' - अमरः), निरन्तरं परिवृतेन, अधोभागत्वेन, निहितदीर्घं, (शाल्मलीवृक्षस्य) आवापः इव)

तुङ्गस्कन्धावलम्बिभिरनिलवेल्लितैरहिनिर्मोकैर्धृतोत्तरीय इव (उन्नतप्रकाण्डम् अवलम्बनशीलैः, वायुना सञ्चलितैः, सर्पनिर्मोकैः/कञ्चुकैः, धृतम् उत्तरीयमिव)

(संव्यानम्, ऊर्ध्ववस्त्रम् - अमरः)

दिक्क्रवाल - परिमाणमिव गृह्णता भुवनान्तरालविप्रकीर्णेन शाखासंचयेन प्रलयकालताण्डव - प्रसारितभुजसहस्रमुडुपतिशेखरमिव विडम्बयितुमुद्यतः (ककुभां मण्डलस्य परिमितं ग्रहणं कुर्वता इव, लोकानाम् अभ्यन्तरभागे इतस्ततः पर्यस्तेन, शाखानां/लतानां('समे शाखालते' - अमरः) समूहेन, प्रलयकाले संहारसमये यस्मिन् ताण्डवे विस्तारितबाहुसहस्रेण नक्षत्राणां पतिः चन्द्रः, शिरोभूषणं यस्य तम्, महादेवम् अनुकर्तुं कृतोद्योगः इव)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुराणतया पतनभयादिव वायुस्कन्धलग्नः निखिलशरीरव्यापिनीभिः अतिदूरोन्नताभिर्जीर्णतया (प्राचीनत्वेन/जीर्णत्वेन, स्खलनभीतेः इव, वायुसंचलन अवकाश - आकाशे, वायोः स्कन्धे लग्नः इव, पतनभयात् वायुः शाल्मलीतरोः उन्नतप्रकाण्डे लग्नः इव प्रतीयते इत्यर्थः)। समस्तशरीरव्याप्तत्वात् अधिकदूरोन्नताभिः वार्द्धक्येन/पुराणतया नाडीभिः इव लताभिः परिवेष्टितः('नाडी तु धमनिः शिरा" - अमरः)।

जरातिलकबिन्दुभिरिव कण्टकैराचिततनुः (वार्द्धक्ये तिलकालकैः इव द्रुमतीक्ष्णाङ्गैः व्याप्तशरीरः वृक्षः)

इतस्ततः परिपीतसागरसलिलैर्गगनागतैः पत्ररथैरिव शाखान्तरेषु निलीयमानैः क्षणमम्बुभारालसैरार्द्रीकृतपल्लवैर्जलधरपटलैरप्यदृष्टशिखरः (यत्र यत्र पानविषयीकृतैः सागरजलैः, आकाशतलादायातैः, शाखानाम् अवकाशेषु गुप्तरूपेण तिष्ठद्भिः पक्षिभिरिव, कंचित्कालं पीतजलभरेण आलस्ययुक्तैः/मन्दगतिभिरिव, क्लिन्नीकृतकिसलयैः, मेघसमूहैः अपि, अनवलोकितः ऊर्ध्वभागः)

तुङ्गतया नन्दनवनश्रियमिव अवलोकयितुमभ्युद्यतः (उन्नतत्वेन देवेन्द्रोद्यानशोभां द्रष्टुं तत्परः इव।

स्वसमीपवर्तिनामुपरि संचरतां गगनतलगमन - खेदायासितानां रविरथतुरङ्गमाणां सृक्कपरिस्रुतैः फेनपटलैः सन्देहित - तूलराशिभिर्धवलीकृतशिखरशाखः - (स्वनिकटस्थितानामूर्ध्वभागे, चञ्चलतां, नभसः मार्गेण गत्या, परिश्रान्तानां, तादृशानां, सूर्यस्यन्दनाश्वानां, ओष्ठप्रान्तपतितैः, सन्देहविषयीकृतैः कार्पाससमूहैरिव, डिण्डीसमूहैः शुक्लीकृताः वृक्षोर्ध्वभागाः, शिखरशाखानाम् अत्युन्नतत्वं व्यज्यते।'तुरगः, तुरंगः, तुरंगक' - अश्वः)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वनगजकपोलकण्डूयन - लग्नमद - निलीन - मत्तमधुकरमालेन लोहश्रृङ्खलाबन्धननिश्चलेनेव कल्पस्थायिना मूलेन समुपेतः (अरण्यहस्तिनां गण्डयोः खर्जूकरणे, सक्तानां, दानवारिणि, अवस्थितमदयुक्तभ्रमराणां पङ्क्त्या, अयश्शृङ्खलानियन्त्रणस्थिरेणेव, आप्रलयं तिष्ठता, तादृशेन बुध्नेन संयुक्तः) "अथ श्रृङ्खला, अन्दुको निगडोऽस्त्री स्यात्" - अमरः।

कोटराभ्यन्तरनिविष्टैः स्फुरद्भिः सजीव इव मधुकरपटलैः (निष्कुहस्य मध्यभागप्रविष्टैः संचलद्भिः भ्रमरसमूहैः श्वासादिप्राणयुक्तः इव)

नलिननाभः इव वनमालोपगूढः (१) श्रीकृष्णः इव वनकुसुममालया आलिङ्गितः २)वृक्षपक्षे - अरण्यपङ्क्त्या आच्छादितः) दुर्योधन इवोपलक्षित - शकुनिपक्षपातः (१)धृतराष्ट्रज्येष्ठपुत्रः दुर्योधनः इव दृष्टः 'शकुनि'आख्ये स्वमातुले आसक्तिः यस्य सः, दुर्योधनेन स्वमातुलस्य शकुनेः साहाय्येनैव कपटद्यूते पाण्डवाः पराजिताः। २)शाल्मलीतरुपक्षे - दृष्टं पक्षिणां छदानां पतनम् यस्मिन् सः)

नवजलधरव्यूह इव नभसि दर्शितोन्नतिः (- १) नूतनमेघसमूहः इव प्रकाशितः उच्छ्रायः। २) वृक्षपक्षे - आकाशे दर्शितोन्नतिः)

अखिलभुवनतलावलोकनप्रासाद इव वनदेवतानां - (विपिन - अधिदेवीनां समस्तलोकतलविलोकनार्थं देवगृहमिव)

अधिपतिरिव दण्डकारण्यस्य – (दण्डकवनस्य स्वामीव)

सर्ववनस्पतीनां नायक इव – सर्वेषां पुष्परहितफलमात्रयुक्तानां वृक्षाणाम् अध्यक्षः इव।

सखेव विन्ध्यस्य – 'विन्ध्य' नाम दक्षिणाचलस्य मित्रमिव।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शाखाबाहुभिरुपगुह्येव विन्ध्याटवीमवस्थितो महान् जीर्णः शाल्मलीवृक्षः (शाखा एव भुजाः, तैः, विन्ध्यवनम् आलिङ्ग्य इव विद्यमानः विशालः पुराणः पिच्छिलातरुः अस्ति। 'पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः' - अमरः)

शुकजन्मवृत्तान्तः

तत्र च शाखाग्रेषु कोटरोदरेषु पल्लवान्तरेषु स्कन्धसन्धिषु जीर्णवल्कलविवरेषु च महावकाशतया विश्रब्ध - विरचित - कुलायसहस्राणि (तस्मिन् शाल्मलीवृक्षे, शाखानाम् अग्रभागेषु, वृक्षरन्ध्राणां मध्यभागेषु, किसलयमध्येषु, प्रकाण्डबन्धेषु, पुरातनतरुत्वक् - छिद्रेषु, प्रचुरप्रदेशत्वेन, विश्वासपूर्वकं/निर्भयं, विनिर्मितानि, नीडानां, सहस्राणि)

दुरारोहतया विगतभयानि नानादेशसमागतानि शुक - शकुनिकुलानि,प्रतिवसन्ति स्म (आरोहणकठिनतया, अपगतग्रहणभीतिः येषां तानि, अनेकजनपदेभ्यः संप्राप्तानि, कीराः, अन्यसामान्यपक्षिणः तेषां सजातीयाः निवासमकुर्वन्)

यैः परिणामविरलदलसंहतिरपि स वनस्पतिरविरल - दल - निचय - श्यामल इवोपलक्ष्यते दिवानिशं निलीनैः (अहोरात्रं स्थितैः शुकशकुनिकुलैः, प्राचीनत्वेन हेतुना अल्पपत्रसमूहः पूर्वोक्तः स शाल्मलीवृक्षः निबिडपत्रसमूहेन नीलवर्णः इव अवलोक्यते)

ते च तस्मिन् वनस्पतावतिवाह्यातिवाह्य निशामात्मनीडेषु, प्रतिदिनमुत्थायोत्थाय आहारान्वेषणाय नभसि विरचितपङ्क्तयः (ते शुकशकुनयः पूर्वोक्ते शाल्मलीतरौ, स्वकुलायेषु रात्रिम् उषित्वा/यापयित्वा, प्रत्यहम् निद्रां प्रहाय, भक्ष्यपदार्थगवेषणाय, आकाशे कृतश्रेणयः)

मदकल - बलभद्र - हलधर - हलमुखात्क्षेप - विकीर्णबहुस्रोतसमम्बरतले कलिन्दकन्यामिव दर्शयन्तः (मधुपानमत्तत्वेन मनोहरः बलरामः, तस्य सीरस्य अग्रभागेन, आकर्षणेन, विक्षिप्तप्रचुरप्रवाहां, यमुनां/कालिन्दीनदीम्, नभसि दर्शनीयतां प्रापयन्तः इव)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सुरगजोन्मूलित - विगलदाकाशगङ्गा - कमलिनीशङ्कामुत्पादयन्तः (देवहस्तिना उत्पाटिता, अधःपतन्त्याः आकाशगङ्गायाः पद्मिनी वा इति सन्देहं जनयन्तः तादृशाः शुक - शकुनयः।

दिवसकर - रथतुरग - प्रभानुलिप्तमिव गगनतलं प्रदर्शयन्तः (आकाशतलं सूर्यरथाश्वानां हरितकान्त्या, अनुलेपयुक्तमिव प्रदर्शनं कुर्वन्तः)

सञ्चारिणीमिव मरकतस्थलीं विडम्बयन्तः,शैवलपल्लवावलीमिवाम्बरसरसि प्रसारयन्तः सञ्चरणशीलां हरिन्मणिभुवं, (गारुत्मतं मरकतश्यामगर्भो हरिन्मणिः - अमरः) अनुकुर्वन्त इव, आकाशः एव कासारः तस्मिन्, शैवलस्य किसलयपङ्क्तिं विस्तारयन्तः इव

गगनावततैः पक्षपुटैः कदलीदलैरिव दिनकर - खरकर - निकर - परिखेदितान्याशामुखानि वीजयन्तः, वियति विसारिणीं शष्पवीथीमिव आरचयन्तः(नीलत्वसाम्यात् रम्भापत्रैरिव, आकाशे विस्तृतैः पत्रपुटैः, सूर्यस्य तीक्ष्णकिरणानां समूहैः संतापं प्राप्तानि, तादृशानि दिग्वदनानि, वातपात्राणि कुर्वन्तः इव, आकाशे विसरणशीलां बालतृणपङ्क्तिं कुर्वन्तः इव)

सेन्द्रायुधमिवान्तरिक्षमादधाना विचरन्ति स्म (आकाशं शक्रधनुषा सहितमिव 'इन्द्रायुधं शक्रधनुः' - अमरः, अनेकवर्णसमूहेन कुर्वाणः ते शुकशकुनयः व्यचरन्)

कृताहाराश्च पुनः प्रतिनिवृत्त्यात्मकुलायावस्थितेभ्यः शावकेभ्यः विविधान् फलरसान् कलममञ्जरीविकारांश्च प्रहत - हरिण - रुधिरानुरक्त - शार्दूलनखकोटिपाटलेन चञ्चुपुटेन दत्त्वा दत्त्वा अधरीकृत - सर्वस्नेहेन असाधारणेन गुरुणा अपत्यप्रेम्णा तस्मिन्नेव क्रोडान्तनिहिततनयाः क्षपाः क्षपयन्ति स्म (विहितभक्षणं यैः ते, शुकशकुनयः, भूयः परावृत्य, स्वनीडेषु विद्यमानशिशुभ्यः ('पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः' –अमरः), विविधप्रकारान् सस्यनिर्यासान् क्षालिधान्यवल्लयः, तासां परिणतान्कणान्,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्यापादितमृगरक्तमिव, व्याघ्रनखाग्रभाग - श्वेतरक्तमिव तेन, तादृशेन त्रोटिसंपुटेन वितीर्य/दत्त्वा, न्यूनीकृतसकलपदार्थप्रणयेन, तादृशेन असामान्येन महता सन्तानस्नेहेन, तस्मिन् शाल्मलीतरौ एव, उत्सङ्गाभ्यन्तरे न्यस्ताः आत्मजाः, ते, रात्रीः यापितवन्तः ('त्रियामा क्षणदा क्षपा' - अमरः)

एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्त्तमानस्य कथमपि पितुरहमेवैको विधिवशात् सूनुरभवं (एकस्मिन् पुराणनिष्कुहे ('निष्कुहः कोटरं वा ना' - अमरः), पत्न्या समं, निवासं कुर्वतः चरमे अवस्थायां/वार्द्धक्ये विद्यमानस्य, केनापि प्रकारेण जनकस्य भाग्यवशात्, अहमेकाकी सुतः अभूवम्)

अतिप्रबलया चाभिभूता ममैव जायमानस्य प्रसववेदनया जननी मे लोकान्तरमगमत् (मम, उत्पद्यमानस्य, एव, अतिशयदृढप्रसूतिव्यथया, मम माता/प्रसूः, लोकान्तरं गता)

अभिमतजायाविनाशशोकदुःखितोऽपि खलु तातः सुतस्नेहादभ्यन्तरे निगृह्य पटुप्रसरमपि शोकमेकाकी मत्संवर्धनपर एवाभवत् (अभीष्टभार्यायाः मरणेन दुःखेन पीडितोऽपि, निश्चयेन जनकः तनयवात्सल्यात् तीव्रप्रसरशोकमपि अन्तःकरणे अवरुध्य, एकाकी एव सुतस्य मत्पोषणतत्परः अभूत्)

अतिपरिणतवयाश्च कुशचीरानुकारिणीमल्पावशिष्ट - जीर्ण - पिच्छजाल - जर्जराम् अवस्त्रस्तांसदेशशिथिलाम् अपगतोत्पतनसंस्कारां पक्षसन्ततिं उद्वहन् (अतिवृद्धः सः दर्भवल्कलयोः सदृशं, स्तोकावशिष्टेन जीर्णबर्हसमूहेन जीर्णं, गलितस्कन्धप्रदेशश्लथया, वार्धक्येन इत्यर्थः, उड्डयनवेगरहितं पक्षसमूहं धारयन्)

उपारूढकम्पतया सन्तापकारिणीमङ्गलग्नां जरामिव विधुन्वन् (वेपथुप्राप्ततया, देहावयवपीडाविधायिनीं वृद्धावस्थामिव पत्रसन्ततिं कम्पयन्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अकठोरशेफालिकाकुसुम - नाल - पिञ्जरेण कलममञ्जरी - दलन - मसृणित - क्षीणोपान्तलेखेन स्फुटिताग्रकोटिना चञ्चुपुटेन, परनीडपतिताभ्यः शालिवल्लरीभ्यस्तण्डुलकणान् आदायादाय वृक्षमूलनिपतितानि च शुककुलावदलितानि फलशकलानि समाहृत्य परिभ्रमितुमशक्तो मह्यमदात् (कोमलनिर्गुण्डीपुष्पदण्डमिव पिङ्गलवर्णेन, शालीवल्लरीविदारणेन, स्निग्धक्षीण - प्रान्तराजिः यस्य तेन, विशीर्ण - अग्र्यभागयुक्तेन, चञ्चुपुटेन अन्यकुलायेभ्यः पतितशालितण्डुलकणान् वारं वारं गृहीत्वा, कीरैः अवदलितानि, तरुमूलपतितानि सस्यखण्डानि च अवचित्य, अशक्तिवशात् परिभ्रमणं कर्तुमसमर्थः सन् मह्यं दत्तवान्)

प्रतिदिवसमात्मना च मदुपभुक्तशेषम् अकरोदशनम् (प्रत्यहं स्वयं च मद्भक्षितादवशिष्टं भोजनमकरोत्)

एकदा तु प्रभातसन्ध्यारागलोहिते गगनतले, कमलिनी - मधुरक्त - पक्षसम्पुटे वृद्धहंस इव मन्दाकिनीपुलिनादपर - जलनिधि - तटमवतरति चन्द्रमसि, (एकदा, प्रातःकालस्य सन्धिवेलायां, रक्तवर्णाकाशतले, पद्मिन्याः रसेन अरुणवर्णं प्राप्तं छदसंपुटयुक्तं वृद्धकलहंसमिव चन्द्रे आकाशगङ्गासैकतात् अन्यपश्चिमसमुद्रतीरम् अवतरति सति)

विघटमान - कमलखण्ड - मधुसीकरासारवर्षिणि कुसुमामोदतर्पितालिजाले निशावसानजातजडिम्नि मन्द - मन्दसञ्चारिणि प्रवाति प्रभातिके मातरिश्वनि

(विकासं प्राप्नुवतः पद्मसमूहस्य पुष्परसकणानां, धारासम्पातवर्षिणि, पुष्पसौरभेण प्रीणितभ्रमरसमूहे, रात्रिसमाप्त्युत्पन्नशीतले, शनैः शनैः , सञ्चरणशीले प्रातःकालभवे, वायौ प्रवहति सति)

कमलवनप्रबोधमङ्गलपाठकानां इभगण्डडिण्डिमानां मधुलिहां कुमुदोदरेषु घटमान - दलपुट - निरुद्धपक्ष - संहतीनामुच्चरत्सु हुङ्कारेषु (पद्मकाननस्य कमलविकसने,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्तुतिपाठकारिणां, हस्तिकपोलेषु डिण्डिमवच्छब्दकारिणां समानां तादृशानां भ्रमराणां, कैरवाणां सङ्कुचितत्वात् तन्मध्यभागे निरुद्धानां तेषामेव हूङ्कारध्वनिषु गुञ्जत्सु)

प्रभातशिशिरवाय्वाहतमुत्तप्तजतुरसाश्लिष्ट - पक्ष्ममालमिव सशेष - निद्राजिह्मिततारं चक्षुरुन्मीलेयत्सु शनैः शनैरूषरशैय्या - धूसरक्रोडरोमराजिषु वनमृगेषु - (तृणरहितशय्यास्थानेन धूम्रवर्णभुजान्तरलोमपङ्क्तियुक्तवनहरिणेषु, प्रातःकालस्य शीतवातेन स्पृष्टं, सन्तप्तलाक्षारसेन संयोजितं, अवशेषनिद्रया वक्रतारं नेत्रं मन्दं मन्दं विकासयत्सु सत्सु)

पम्पासरःपर्यन्त - तरु - शिखर - सञ्चारिणि अध्यासित - गिरिशिखरे दिवसकर - जन्मनि हृततारे पुनरिव कपीश्वरे वनमभिपतति बालातपे, स्पष्टे जाते प्रत्यूषसि (–१) बालातपपक्षे - पम्पासरसः प्रान्तस्थितवृक्षाणां ऊर्ध्वभागे गमनशीले, आश्रितपर्वतश्रृङ्गे, सूर्यात् उत्पत्तिः यस्य तस्मिन्, दूरीकृतनक्षत्राणि येन तस्मिन् २)सुग्रीवपक्षे - अपहृता ताराख्या वालिपत्नी येन,यस्मिन्, बालसूर्योद्योते, वानाराधिपतौ इव भूयः अरण्यमाक्रमति सति, प्रातःकाले व्यक्ते भूते सति)

नचिरादेव दिवसाष्टमभागभाजि स्पष्टभासि भास्वति भूते, प्रयातेषु च यथाभिमतानि दिगन्तराणि शुककुलेषु (अल्पकालेनेव सूर्ये दिनस्य चतुर्घटिकात्मकांशमाश्रये सति, अत एव, व्यक्तकान्तिः तथोक्ते, संवृत्ते सति, कीरसमूहाः यथेष्टान् आशाभागान् गतेषु सत्सु)

कुलाय - निलीननिभृत - शुक - शावकसनाथेऽपि, निःशब्दतया शून्य इव तस्मिन् वनस्पतौ, स्वनीडावस्थित एव ताते, मयि च शैशवादसञ्जातबलसमुद्भिद्यमानपक्षपुटे, पितुः समीपवर्तिनि कोटरगते (नीडेषु कीरशिशवः गुप्ताः निश्चलाः, तैः सनाथे अपि, शब्दरहितत्वात्, पक्षिरहित इव पूर्वोक्तशाल्मलीवृक्षः। मत्पिता निजकुलाये अतिष्ठत्। बाल्यात् असञ्जातबलः समुत्पद्यमानपक्षपुटः अहं वैशंपायनः, मम पितुः निकटस्थकोटरं गतः)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सहसैव तस्मिन् महावने संत्रासितसकलवनचरः सरभसमुत्पतत्पतत्रिपक्षपुटशब्द - सन्ततः, भीतकरिपोत - चीत्कारपीवरः प्रचलितलताकुल - मत्तालिकुलक्वणितमांसलः परिभ्रमदुद्घोण - वनवराह - रवघर्घराः गिरिगुहा - सुप्त - प्रबुद्ध - सिंहनादोपबृंहितः (तदैव पूर्वोक्तारण्ये समस्तवनचारिणः संत्रासिताः, सवेगमुड्डीयमानानां पक्षिणां पतत्रपुटशब्दैः व्याप्तः, भीतगजानां चीत्काराः पुष्टः, कम्पितलतासु व्याकुलीभूतभ्रमरकुलस्य गुञ्जनेन पुष्टः, परिभ्रमतां उन्नतनासानां वनशूकराणां कठोररवेन, शैलकन्दरासु निद्राणाः, किन्तु शब्दैः प्रबुद्धानां केसरिणां गर्जनशब्दः वृद्धिं गतः)

कम्पयन्निव तरून् भगीरथावतार्यमाणगङ्गाप्रवाहकलकल - बहलो भीतवनदेवता - आकर्णितो मृगयाकोलाहलध्वनिः उदचरत् (सूर्यवंशोत्पन्नराजविशेषेण, भूमिं नीयमानस्य विष्णुपदीस्रोतसः इव कोलाहलशब्देन त्रस्तवनदेवताभिः श्रुतः। आखेटकलकलशब्दः उदतिष्ठत्)

आकर्ण्य च तमहमश्रुतपूर्वमुपजातवेपथुरर्भकतया, जर्जरित - कर्णविवरो भयविह्वलः समीपवर्तिनः पितुः प्रतीकारबुद्ध्या, जराशिथिलपक्षपुटान्तरमविशम् (अहम् अनाकर्णितपूर्वं मृगयाकोलाहलध्वनिं श्रुत्वा, शिशुत्वेन संजातकंपः, विदीरितश्रोत्रविवर - युक्तः, निकटस्थितस्य पितुः जराश्लथपतत्रयुगलान्तः त्रासविह्वलः अहं प्रविष्टवान्)

अनन्तरञ्च 'सरभसमितो गजयूथपति - ललित - कमलिनी - परिमलः, इतः क्रोडकुल - दश्यमान - भद्रमुस्ता - रसामोदः, इतः करिकलभ - भज्यमान - सल्लकी - कषाय - गन्धः, इतो निपतित - शुष्कपत्र - मर्मरध्वनिः, इतो वनमहिष - विषाणकोटि - कुलिशभिद्यमान - वल्मीकधूलिः, इतो मृगकदम्बकम्, इतो वनगजकुलम्, इतो वनवराहयूथम्, इतो वनमहिषवृन्दम्, इतः शिखण्डिमण्डलविरुतम्, इतः कपिञ्जलकुल - कलकूजितम्, इतः कुररकुल - क्वणितम्, इतो मृगपतिनख - भिद्यमान - कुम्भ - कुञ्जर - रसितम्, इयम् आर्द्रपङ्कमलिना वराहपद्धतिः, इयम् अभिनव - शष्पकवलरस - श्यामला हरिण - रोमन्थ -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

फेन - संहतिः, इयमुन्मद - गन्धगजगण्ड - कण्डूयन - परिमलनिलीन - मुखरमधुकर - विरुतिः, एषा निपतित - रुधिरबिन्दुसिक्त - शुष्कपत्रपाटला रुरुपदवी, एतद् द्विरद - चरणमृदित - विटप - पल्लवपटलं, एतत् खड्गिकुलक्रीडितम्, एष नखकोटि - विकटविलिखितविकट - पत्त्रलेखो रुधिरपाटलः, करिमौक्तिकदन्तुरो मृगपतिमार्गः, एषा प्रत्यग्रप्रसूतवन–मृगीगर्भ - रुधिर - लोहिनी भूमिः, इयमटवीवेणिकानुसारिणी पक्षचरस्य यूथपतेः मदजलमलिना सञ्चारवीथी, चमरीपङ्क्तिरियमनुगम्यताम्, उच्छ्वुष्कमृग - करीषपांसुला त्वरिततरम्, इयं वनस्थली अध्यास्यतां, तरुशिखरमारुह्यताम्, आलोक्यतां दिगियम्, आकर्ण्यतामयं शब्दः, गृह्यतां धनुः, अवहितैः, स्थीयतां, विमुच्यन्तां श्वानः' इत्यन्योन्यमभिवदतो मृगयासक्तस्य महतो जनसमूहस्य तरुगहनान्तरित - विग्रहस्य क्षोभितकाननं कोलाहलमश्रृणवम् (तदनन्तरं, अस्मिन्प्रदेशे, सवेगं, हस्तिसमूहश्रेष्ठैः मर्दितकमलिनीभ्यः उत्पन्नसुगन्धः, वनवराहसमूहैः भक्ष्यमाणनागरमोथारसस्य सुगन्धः, गजशावकैः आमर्द्यमानसल्लकीलता

कषायगन्धः च प्रसरन्ति। इतः वृक्षच्युतशुष्कपलाशानां मर्मरशब्दः, इतः विपिनसैरिभाणां कुलिशसदृशै श्रृङ्गाग्रैः विदारितवल्मीकरजः, इतः, हरिणयूथं, इतः, अरण्यहस्तिसमूहः, इतः, विपिनसूकरवृन्दम्, इतः, विपिनसैरिभसमुदायः, इतः मयूरसमूहस्य शब्दः, इतः, गौरतित्तिरीणाम् चातकानां वा मधुरध्वनिः, इतः, कुररपक्षिणां ध्वनिः, इतः, सिंहाः गजमस्तकपिण्डान् नखैः भिद्यमानाः, गजचीत्कारशब्दः च श्रूयन्ते, एषः क्लिन्नकर्दमेन मलिनंप्राप्तः वनसूकरमार्गः, मृगाणाम् अचिरादेव चर्वितबालतृणरसेन कृष्णवर्णा, मृगाणां चर्वितचर्वणस्य डिण्डीरसमूहः, एषः उत्कटमदगजकरटकण्डूत्याः आमोदेन अवस्थितभ्रमराणां झङ्कारः, एषः भुवि स्रस्तरक्तपृषद्भिः उक्षितनीरसपलाशैः, श्वेतरक्तः रुरुमृगमार्गः, एषः गजपादचूर्णितः वृक्षकिसलयसमूहः, एतत् गण्डकसमूहस्य क्रीडास्थलम्, एषः नखराग्रविकृतचित्रितपत्राकृतिचिह्नयुक्तः रुधिरेण श्वेतरक्तः, हस्तिनां मुक्ताखण्डैः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विषमसिंहपदवी, एषा नवप्रसविन्याः वनहरिण्याः भ्रूणरक्तेन रक्तवर्णपृथ्वी, यूथसञ्चरणशीलस्य मुख्यहस्तिनः दानसलिलमलीमसा वनभूमेः केशबन्धमिव दृश्यमानां सञ्चरणपद्धतिः इयम्, एषा चमरमृगश्रेणी अनुव्रज्यतां, अतिपुरातनहरिणपुरीषैः धूलीयुक्तः अयं वनप्रदेशः शीघ्रतरम् आश्रीयताम्, वृक्षोर्ध्वभागाः आरोहणविषयीक्रियताम्, एतद्दिशा दृश्यताम्, एतद्ध्वनिः श्रूयताम्, पशुपक्ष्यादिवधाय कार्मुकमादीयताम्, युष्माभिः सावधानैः स्थातव्यम्, कुक्कुराः आखेटयोग्यजन्तुवधाय, बन्धनात् विमुच्यन्ताम् ' इत्येवम् भाषमाणस्य मृगयातत्परस्य, समूहस्य कोलाहलशब्दः वने अहं श्रुतवान्)

शुनाञ्च सरभसविमुक्तघर्घरध्वनीनां वनान्तरव्यापिना ध्वानेन सर्वतः प्रचलितमिव तदरण्यमभवत् (वेगपूर्वकसंत्यक्तसारमेयाणां घर्घरध्वनिभिः परितः कम्पितमिव काननम्भूत्)

अचिराच्च प्रशान्ते तस्मिन् मृगयाकलकले (अल्पकालेन पूर्वोक्तम् आखेटकोलहलं शान्तिमुपगतम्)

मन्दीभूतभयोऽहम् उपजातकुतूहलः पितुरुत्सङ्गादीषदिव निष्क्रम्य कोटरस्थ एव शिरोधरां प्रसार्य सन्त्रास - तरल - तारकः शैशवात् किमिदमित्युपजातदिदृक्षस्तामेव दिशं चक्षुः प्राहिणवम् (अल्पीभूतभययुक्तः अहं जनकाङ्कात् स्तोकमिव निर्गत्य निष्कुहस्थितः एव ग्रीवां विस्तार्य भयहेतुना चञ्चलकनीनिकः, बाल्याद्धेतोः किमेवं समुत्पन्नमिति दर्शनेच्छया तामेव काष्ठां प्रति दृष्टिं प्रसारितवान्)

अनेकसहस्रसंख्यम् ,अतिभयजनकम्, उत्पातवेतालव्रातमिव शबरसैन्यमद्राक्षम् - (बहुसहस्रयुक्तं, अतिशयभीत्युत्पादकं, भूत - अधिष्ठितशवानां समूहमिव व्याधानीकं/ म्लेच्छविशेषाऽनीकं दृष्टवान्)

मध्ये च तस्य महतः शबरसैन्यस्य प्रथमे वयसि वर्तमानम्, अंशक - अवतारमिव कृतान्तस्य, सहोदरमिव पापस्य, सारमिव कलिकालस्य, भीषणमपि महासत्त्वतया गम्भीरमिव उपलक्ष्यमाणम्, अनभिभवनीयाकृतिं, मातङ्गनामानं, शबरसेनापतिमपश्यम् । अभिधानन्तु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्य पश्चादहम् अश्रौषम् (पूर्वोक्तस्य विशालस्य भिल्लबलस्य अन्तरे, यौवनावस्थायां विद्यमानं, यमराजस्य एकभागस्य अवतारमिव, किल्बिषस्य सोदरमिव, चतुर्थयुगस्य सारमिव, भयानकमपि, उदात्तस्वभावतया अस्फुटाशयमिव, परिदृश्यमानं, तिरस्कर्तुम् अशक्याकारयुक्तं मातङ्गसंज्ञकं, शबरसैन्यस्य अध्यक्षम् अपश्यम्। तस्य नामधेयं तु अनन्तरम् अहम् श्रुतवान्)

आसीच्च मे मनसि - 'अहो! मोहप्रायमेतेषां जीवितं, साधुजनगर्हितञ्च चरितम्' - (आश्चर्यं! एतेषां शबराणां जीवनम् अज्ञानप्रचुरम्, आचरणं च शिष्टजनैः निन्दितं च' इति मम मनसि अभवत्)

स शबरसेनापतिः अटवीभ्रमणसमुद्भवं श्रममपनिनीषुरागत्य तस्यैव शाल्मलीतरोः अधश्छायायाम्, अवतारित - कोदण्डस्त्वरितपरिजनोपनीत - पल्लवासने समुपाविशत् -

(एष शबरचमूनायकः वने संचरणोत्पन्नं परिश्रमम् अपनेतुमिच्छन् पूर्वोक्तशाल्मलीतरोः अधस्तात् अनातपप्रदेशमागत्य, स्वस्कन्धाद् धनुमपसार्य/स्थानान्तरङ्कृत्वा, सेवकेनोपनीते किसलयासने, उपविष्टवान्)

अपगतश्रमश्चोत्थाय परिपीताम्भसा सकलेन तेन शबर - सैन्येनानुगम्यमानः शनैः शनैरभिमतं दिगन्तरमयासीत् (निवृत्तमृगयाजनितखेदः सन् सः शबरसेनापतिः, उत्थाय, निहितसलिलपानेन पूर्वकथितशबरसेनया, अनुस्रियमाणः सन् मन्दं मन्दम् अभीष्टमन्यां दिशं प्रति गतवान्)

एकतमस्तु जरच्छबरस्तस्मात्पुलिन्द - वृन्दादनासादितहरिण - पिशितः पिशिताशन इव विकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुतले मुहूर्तमिव व्यलम्बत। अन्तरिते च तस्मिन् शबरसेनापतौ स जीर्णशबरः पिबन्निव अस्माकमायूंषि रुधिरबिन्दुपाटलया कपिलभ्रूलता - परिवेष - भीषणया दृष्ट्या गणयन्निव शुककुल - कुलायस्थानानि श्येन इव विहगामिषस्वाद - लालसः सुचिरमारुरुक्षुस्तं वनस्पतिमामूलादपश्यत् -(अन्यतमस्तु वृद्धशबरः पूर्वोक्तशबरसमूहात्, अप्राप्तमृगमांसः मांसभक्षकः इव भयदाकारः मांसखादने स्पृहायुक्तः सन्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्मिन्नेव शाल्मलीतरोः अधस्तात् कञ्चित्कालमिव विलम्बम् अकरोत्। शबरसेनापतिः अन्यत्र गतः, सः वृद्धपुलिन्दः पक्षिणां प्राणान् पानविषयङ्कुर्वन्निव, श्वेतरक्ततया पिङ्गल - नयनलोमवल्या परिधिना भयङ्करनयनाभ्यां कीरसमूहनीडस्थलानि गणनं कुर्वन्निव, पक्षिमांस - आस्वादनाभिलाषयुक्तः पत्त्री इव, तमेव वृक्षमारोढुमिच्छन्निव, बहुकालं यावद् व्यलोकयत्)

उत्क्रान्तमिव तस्मिन् क्षणे तदालोकन - भीतानां शुककुलानामसुभिः (तस्मिन्नवसरे तस्य जरच्छबरस्य दर्शनात् त्रस्त - कीरसमूहानां प्राणैः निर्गतमिव)

किमिव हि दुष्करमकरुणानाम्? (निर्दयाः सर्वमपि क्रूरकर्मैवानुतिष्ठन्ति)

यतः स तमनेक - ताल - तुङ्गमभ्रङ्कष - शाखाशिखरमपि सोपानैरिव अयत्नेनैव पादपमारुह्य ताननुपजातोत्पतनशक्तीन्, कांश्चिदल्पदिवस - जातान् गर्भच्छविपाटलान् शाल्मली - कुसुमशङ्कामुपजनयतः, कांश्चिद्विद्यमानपक्षतया नलिन - संवर्त्तिकानुकारिणः, कांश्चिदर्कफलसदृशान्, कांश्चिल्लोहितायमानचञ्चुकोटीन् ईषद्विघटित - दल - पुट - पाटलमुखानां कमलमुकुलानां श्रियमुद्वहतः, कांश्चिदनवरत - शिरःकम्पव्याजेन निवारयत इव प्रतीकाराऽसमर्थान्, एकैकतया फलानीव तस्य वनस्पतेः शाखाऽन्तरेभ्यश्च शुकशावकानग्रहीत्, अपगतासूंश्च कृत्वा क्षितावपातयत् (यस्मात्कारणात् स जरच्छबरः बहुतालोन्नतं, मेघस्पर्शशाखाग्रभागयुक्तं विटपं, सोपानमिव अनायासेनैव आरोहणं कृत्वा, उड्डयनसामर्थ्यमनुत्पन्नान्, स्तोकदिनोत्पन्नान्, भ्रूणकान्तिमिव श्वेतरक्तान्, पिच्छिलापुष्पस्य सन्देहमुत्पादयतः ('पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः') कांश्चित् पक्षोत्पद्यमानतया कमलनवदलान् विडम्पयन्ति, कांशिच् मन्दारफलतुल्यान् कांश्चित् रक्तीभवत्त्रोटीनामग्रभागान्, ईषद्विकसितपत्रपुटश्वेतरक्ताग्रभागानां पद्मकुड्मलशोभां धारयतः, कांश्चित् अनवरतं मस्तकवेपथुच्छलेन 'वयम् अर्भका अत एव न हन्तव्या' इति निवारणङ्कुर्वत इव, प्रतिकरणं प्रतीकारः ('उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति बाहुल्येन दीर्घत्वं),

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वधनिवृत्त्युपाये अशक्तान्, एकमेकं कृत्वा सस्यानीव शाल्मलीतरुमारुह्य स्कन्धाऽभ्यन्तरेभ्यश्च निष्कुहाऽभ्यन्तरेभ्यश्च कीरशिशून् गृहीत्वा, मारयित्वा भूमौ च अक्षिपत्)

तातस्तु तं महान्तमकाण्ड एव प्राणहरमप्रतीकारमुपप्लवमुपनतमालोक्य द्विगुणतरोपजातवेपथुर्मरणभयादुद्भ्रान्त - तरलतारको विषादशून्यामश्रुजलप्लुतां दृशमितस्ततो दिक्षु विक्षिपन् उच्छुष्कतालुरात्मप्रतीकाराक्षमः त्रास - त्रस्त - सन्धि शिथिलेन - पक्षपुटेनाच्छाद्य मां तत्कालोचितं प्रतीकारं मन्यमानः स्नेहपरवशो मद्रक्षणाकुलः किंकर्तव्यताविमूढः क्रोडविभागेन मामवष्टभ्य तस्थौ (पिता तु महदनवसरमेव जीवनहारिणं निवारणोपायरहितम् उपद्रवं प्राप्तं दृष्ट्वा द्विगुणोत्पन्नकम्पः मृत्युभयात् चञ्चलभास्वरकनीनिकः ('तरले भास्वरे चले' - हैमः, 'तारकाऽक्षणः कनीनिका' - अमरः'), खेदेन कान्तिहीनः अश्रुसलिलव्याप्तनेत्रं, यत्र तत्र आशासु प्रेरयन्, अत्यन्तशुष्ककाकुदः स्वस्य आपन्निवृत्युपाये असमर्थः भयात् शिथिलसन्धिबन्धश्लथेन, पक्षसम्पुटेन मामावृत्य, तत्समययोग्यविधिं जानानः प्रेम्णा मत्पालनव्यग्रः तत्समये किंकर्तव्यमिति अजानन् क्रोडयोः मध्यभागे मामवलम्ब्य स्थितः)

असावपि पापः क्रमेण शाखान्तरैः सञ्चरमाणः, क्रोटद्वारमागत्य जीर्णासितभुजङ्ग - भोगभीषणं प्रसार्य विविधवनवराहविस्त्रगन्धिकरतलं कोदण्डगुणाकर्षणव्रणाङ्कित - प्रकोष्ठम् अन्तकदण्डानुकारिणं वामबाहुम् अतिनृशंसो मुहुर्मुहुर्दत्तचञ्चुप्रहारम् उत्कूजन्तमाकृष्य तातं गतासुमकरोत् (अपुण्यकर्मा स जरच्छबरः विटपान्तरैः सञ्चरन् निष्कुहद्वारमेत्य जरठकृष्णसर्पशरीरमिव भयङ्करम्, अनेकविधविपिनशूकरवपया दुर्गन्धहस्ततलं धनुर्ज्यायाः आक्षेपेण व्रणचिह्नितं कर्पूराऽधोभागं यमस्य लगुडमनुकरणशीलं तस्य सव्यभुजं विस्तार्य भूयो भूयः त्रोट्या प्रहरन्तं उच्चैःस्वरेण शब्दायमानं मत्पितरं नीडाद्बहिः आनीय मारितवान्)

मान्तु स्वल्पत्वाद् भयसम्पिण्डिताङ्गत्वात् सावशेषत्वाच्चायुषः कथमपि पक्ष - सम्पुटान्तरगतं नालक्षयत्। उपरतञ्च तमवनितले शिथिलशिरोधरं अधोमुखममुञ्चत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(स्तोकतनुत्वात् भयसङ्कुचितावयत्वाद् आयुषः अवशिष्टत्वात् च महता क्लेशेन पितुः छदभागाभ्यन्तरप्राप्तं वैशम्पायनं मां न अपश्यत्। मृतं श्लथकन्धरम् अवाङ्मुखं मत्पितरं भूतले अक्षिपत्)

अहमपि तच्चरणान्तरे निवेशितशिरोधरो निभृतमङ्कनिलीनस्तेनैव सह अपतं –

(पितुः पादयोर्मध्ये स्थापितग्रीवः, निश्चलः, उत्सङ्गे अन्तर्हितः सन् पित्रैव समं पतितः)

अवशिष्टपुण्यतया तु पवनवशसंपुञ्जितस्य महतः शुष्कपत्रराशेरुपरि पतितम् आत्मानम् अपश्यम्। अङ्गानि येन मे नाशीर्यन्त (सावशेषसुकृततया पवनवशात् संघातरूपेण अवस्थितस्य विपुलस्य नीरसपर्णोर्ध्वभागे स्रस्तं मम शरीरं व्यलोकयं, शुष्कपर्णसमूहोपरि पतितहेतुना मम अवयवाः न चूर्णिताः अभवन्)

यावच्चासौ तस्मात्तरुशिखरान्नावतरति तावदहमवशीर्णपत्रसवर्णत्वात् अस्फुटोपलक्ष्यमाणमूर्तिः पितरमुपरतमुत्सृज्य नृशंस इव प्राणपरित्यागयोग्येऽपि काले बालतया कालान्तरभुवः स्नेहरसस्यानभिज्ञः जन्मसहभुवा भयेनैव केवलम् अभिभूयमानः किञ्चिदुपजाताभ्यां पक्षाभ्यामीषत्कृतावष्टम्भो लुठन्नितस्ततः कृतान्तमुखकुहरादिव विनिर्गतमात्मानं मन्यमानो नातिदूरवर्तिनः शबरसुन्दरीकर्णपूर - रचनोपयुक्तपल्लवस्य, सङ्कर्षणपटनीलच्छाययोपहसत इव गदाधरदेहच्छविम्, अच्छैः कालिन्दीजलच्छेदैरिव विरचितच्छदस्य, वनकरिमदोपसिक्तकिसलयस्य, विन्ध्याटवीकेशपाशश्रियमुद्वहतः दिवाप्यन्धकारित - शाखान्तरस्य, अप्रविष्टसूर्यकिरणमतिगहनपरस्येव पितुरुत्सङ्गमतिमहतः तमालविटपिनो मूलदेशमविशम् (यत्कालपर्यन्तं जरच्छबरः पूर्वोक्तात् शाल्मलीवृक्षोर्ध्वभागात् न अवरोहति, तत्कालमेव अहं पतितपत्रसमानवर्णत्वात् - ('ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु' इति समानस्य सभावः), अप्रकटदृश्यमानशरीरः क्रूर इव मृतपितरं त्यक्त्वा प्राणमोचनोचिते समये अपि, शिशुत्वेन यौवनादि - अवस्थाभाविन इति, वात्सल्यास्वादज्ञानरहितः सहजन्मना भीत्या एव, केवलम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अधिक्रियमाणः, स्तोकोत्पन्नछदाभ्यां, स्तोकं विहितावलम्बः, यत्र तत्र प्रतीघातं कुर्वन्, आत्मानं यमराजमुखात् विनिस्सृतमिव मन्यमानः, समीपस्थितस्य, शबररमणीश्रोत्राभरणनिर्माणे उपयुक्तकिसलयानि यस्य, तस्य, बलभद्रवस्त्रनीलकान्त्या श्रीकृष्णशरीरकान्तिमुपहासं कुर्वत इव, निर्मलयमुनासलिलखण्डैः इव, निर्मितपर्णानि यस्य तस्य, अरण्यगजानां मदैः उक्षितपल्लवानि यस्य तस्य, विन्ध्यपर्वतवनभूमेः कुन्तलकलापशोभां धारयतः, दिवसेऽपि भास्करकिरणाभावविटपाऽभ्यन्तरप्रदेशः यस्य तस्य, अतिशयविशाल - तापिच्छतरोः अकृतप्रवेशभास्करकराः यस्मिन्, तं अत्यन्तवनं, पितुः अङ्कमिव बुध्नप्रेदेशं प्रविष्टवान्)

अवतीर्य च स तेन समयेन क्षितितलविप्रकीर्णान् संहृत्य तान् शुकशिशून् एकलतापाशसंयतान् आबध्य पर्णपुटेऽतित्वरितगमनः सेनापतिगतेनैव वर्त्मना

तामेव दिशमगच्छत् (स वृद्धशबरः शाल्मलीतरोः अवतीर्य, भूतले इतस्ततः पर्यस्तान् शुकशावकान् एकीकृत्य, एकवल्याः बन्धनरज्ज्वा बध्वा, पत्रपुटे आबध्य अतिवेगेन शबरपृतनानायकयातेनैव मार्गेणैव,तामेव काष्ठां, अव्रजत्)

मान्तु लब्धजीविताशं प्रत्यग्र - पितृमरण - शोकशुष्कहृदयं अतिदूरापाताद् आयासितशरीरं, सन्त्रास - जाता सर्वाङ्गोपतापिनी बलवति पिपासा परवशमकरोत्—

(जीवितुमभिलषितं, पितुः मरणशोकशुष्कहृदयं, अतिविप्रकृष्टस्थलपतनाद् आयासितदेहं मां अतिभयात् सकलावयवसन्तापकारिणी जलतृष्णा अधीनमकरोत्)

अनया कालकलया सुदूरमतिक्रान्तः स पापकृदिति परिकलय्य किञ्चिद्

उन्नमितकन्धरो भयचकितया दृशा दिशोऽवलोक्य तृणेऽपि चलिते पुनः प्रतिनिवृत्त इति तमेव पदे पदे पापकारिणमुत्प्रेक्षमाणो निष्क्रम्य तस्मात्तमालतरुमूलात् सलिलसमीपं सर्त्तुं प्रयत्नमकरवम् (सः पापात्मा सुदूरं अतिक्रान्तः इति परिकलनां कृत्वा, ऊर्ध्वीकृतग्रीवः भयभीतदृष्ट्या काष्ठाः दृष्ट्वा अर्जुनेऽपि ("तृणमर्जुनम्" - अमरः,) कम्पमाने सति, शबरः भूयः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रत्यायातः इति विमृश्य, प्रतिपदं पूर्वोक्तवृद्धशबरं दुष्कृताचारं सम्भावयन्, पूर्वोक्ततापिच्छवृक्षनिम्नभागात् निर्गत्य जलनिकटं गन्तुम् अहं यत्नं कृतवान्)

अजातपक्षतया नातिस्थिरतरचरणसञ्चारस्य मुहुर्मुहुर्मुखेन पततो मुहुः तिर्यङ्निपतन्तं आत्मानमेकया पक्षपाल्या सन्धारयतः क्षितितलसंसर्पणभ्रमातुरस्य अनभ्यासवशादेकमपि दत्त्वा पदमनवरतमुन्मुखस्य, स्थूलस्थूलं श्वसतो धूलिधूसरस्य संसर्पतो ममाभून्मनसि अतिकष्टास्ववस्थास्वपि जीवितनिरपेक्षा न भवन्ति खलु जगति प्राणिनां प्रवृत्तयः (अनुत्पन्नछदत्वेन न अतिदृढतरपादन्यासस्य, अत एव पुनःपुनः आननेन पतनं कुर्वतः, पुनः तिरश्चीनं भ्रश्यन्तं, केवलया ("एके मुख्याऽन्यकेवलाः" - अमरः), छदपङ्क्त्या पतनाद्रक्षन्, भूतले गमनेन भ्रान्त्या पीडितस्य, अभ्यासाभावादेकं चरणं निवेश्य, अनवरतमूर्ध्ववदनस्य, श्रमाद्, दीर्घं दीर्घं निश्वसतः, पांसुधूसरितस्य, संसर्पणं कुर्वतः मम मनसि वक्ष्यमाणप्रकारः विचारः अजायत, लोके जन्तूनां प्रवृत्तक्रियाः, अतिशयकठिनदशास्वपि, जीवने निःस्पृहा न विद्यन्ते)

एवमुपरतेऽपि सुगृहीतनाम्नि ताते यदहमविकलेन्द्रियः पुनरेव प्राणिमि। धिङ्मामकरुणम् अतिनिष्ठुरमकृतज्ञं (पितरि मृतेऽपि पुत्रः अहं प्रातिस्विकविषयग्रहणसमर्थहृषीकः तादृशः सन्, भूय एव, श्वसिमि। दयारहितं, अतिशयकठोरं, कृतघ्नं, मां धिक्। नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजन्तूनां -अस्मिन् लोके सकलप्राणिनां जीवनादपरमभीष्टतरं न विद्यते)

अहो! सोढपितृमरणशोकदारुणं येन मया जीव्यते, उपकृतमपि नापेक्ष्यते। खलं हि खलु मे हृदयम्। अहं हि लोकान्तरगतायामम्बायां नियम्य शोकावेगमाप्रसव - दिवसात् परिणतवयसापि सता तातेन तैस्तैरुपायैः संवर्द्धनक्लेशमतिमहान्तमपि स्नेहवशादगणयता यत् परिपालितः, तत्सर्वमेकपदे विस्मृतम्। 'अतिकृपणाः खल्वमी प्राणाः, यदुपकारिणमपि तातं क्वापि गच्छन्तमद्याऽपि नानुगच्छन्ति'। सर्वथा न कश्चिन्न खलीकरोति जीविततृष्णा,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदीदृगवस्थमपि मामयमायासयति जलाभिलाषः (आश्चर्यम्! पितृमरणशोकेन अपि मया प्राणधारणं क्रियते। पितृकृतोपकारोऽपि न अपेक्षाविषयीक्रियते, यतः मम चित्तं कृतघ्नम्। मम माता परलोकं गता, मम पिता तन्मन्युजवं निरुध्य, मम जन्मदिनादारभ्य, वृद्धेन तेन, अनेकविधैः जीवनधारणप्रकारैः, पुत्रे मयि वात्सल्यवशात्, मत्सम्पोषणदुःखम् अत्यधिकमपि, क्लेशत्वेन अचिन्तयता मम पित्रा, अहं परिरक्षितः, किन्तु मया तत्सकलम् अकस्मादेव विस्मृतम्। निश्चयेन मम प्राणाः अतिकृपणाः/अत्यन्तमनुदाराः, हि उपकारशीलं, अस्मिन्दिने कुत्रापि व्रजन्तं, मम पितरं, नानुव्रजन्ति। "सर्वप्रकारैः जीवनाभिलाषः, कमपि पुरुषं न दुर्जनीकरोति इति न(द्वौ नञौ एकं प्रकृताऽर्थं द्योतयत) इति। 'अखलं खलं यथा सम्पद्यते तथा करोति - खलीकरोति इति अभूततद्भावे च्विः'। यस्मात् हेतोः जनकमरणशोकपरवशमपि मां जलाभिलाषः आयासयुक्तं करोति)

मन्ये चागणित - पितृमरण - शोकस्य निर्घृणतैव केवलमियं मम सलिलपानबुद्धिः। अद्यापि दूर एव सरस्तीरम्। तथाहि जलदेवतानूपुर - रवानुकारि दूरेऽद्यापि कलहंस - विरुतम् अस्फुटानि श्रूयन्ते सारसरसितानि, अयं च। विप्रकर्षादाशामुखविसर्पण - विरलः सञ्चरति नलिनी षण्डपरिमलः। दिवसस्य चेयं कष्टा दशा वर्तते। तथाहि रविरम्बरतलमध्यवर्ती स्फुरन्तमातपमनवरतमनलधूलि - निकरमिव विकिरति करैः, अधिकामुपजनयति तृषम्। सन्तप्त - पांसु - पटल - दुर्गमा भूः, अतिप्रबल - पिपासा - अवसन्नानि गन्तुमल्पमपि मे नालमङ्गकानि। अप्रभुरस्म्यात्मनः। सीदति मे हृदयम्। अन्धकारतामुपयाति चक्षुः। अपि नाम खलो विधिरनिच्छतोऽपि मे मरणमद्यैव उपपादयेत्? (पितृमरणशोकस्य मम इयं जलपानाऽभिलाषा निरनुकम्पा एव। अधुनापि कासारतटं विप्रकृष्टदूर एव अस्ति। तथा हि जलदेवतानां नूपुरध्वनिः, तदनुकारि कलहंसकूजितं, सारसानाम् अव्यक्ताः शब्दाः च विप्रकृष्टप्रदेशे श्रूयन्ते। दूराद् दिङ्मुखेषु यत्प्रसरणेन कमलिनीसमूहानां विमर्दनजनितगन्धः प्रसरति। दिनस्य मध्याह्नसमयः विद्यते इत्यर्थः। आकाशतलमध्यगामी सूर्यः, अनवरतदीप्यमानतेजः अग्निचूर्णसमूहमिव किरणैः विकिरन्, प्रबलां पिपासां प्रकटयति। भूमिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उष्णधूलिसमूहेन दुःखेन गन्तुमशक्या अस्ति। अत्यधिकतृष्णया क्लान्ताः मम देहावयवाः स्तोकमपि चलितुम् असमर्थाः। आत्मनः हस्तपादादि चालयितुमपि असमर्थः अस्मि। मम हृदयम् अवशीर्यते। नेत्रं तिमिरतां सम्प्राप्नोति। हतकविधिः अनिच्छतः मम अद्यैव मरणं कुर्यात्किम्?)

एवं चिन्तयत्येव मयि, तस्मात्सरसः नातिदूरवर्तिनि तपोवने जाबालिर्नाम महातपा मुनिः प्रतिवसति स्म। तत्तनयश्च हारीतनामा मुनिकुमारकः, सवयोभिरपरैः तपोधनकुमारकैः अनुगम्यमानः, तेनैव पथा कमलसरः सिस्नासुः उपागमत् (इत्थं मयि चिन्तां कुर्वति सति, पूर्वोक्तकासारसमीपवर्तिनि तपोवने, नाम्ना जाबालिरिति महातपस्वी, ऋषिः वासमकरोत्। अस्य मुनेः पुत्रः हारीतनामा तपस्विमाणवकः, समवयस्कैः तपस्विदारकैः अनुस्त्रियमाणः, तेनैव मार्गेण, स्नातुमिच्छुः सन् पद्मप्रचुरकासारसमीपं गतः)

प्रायेणाकारण - मित्राण्यतिकरुणार्द्राणि च सदा खलु भवन्ति सतां चेतांसि। यतः स मां तदवस्थमालोक्य समुपजातकरुणः समीपवर्त्तिनमृषिकुमारकमन्यतममब्रवीत् - 'अयं कथमपि शुकशिशुरसञ्जातपक्षपुट एव तरुशिखरादस्मात् परिच्युतः, श्येनमुखपरिभ्रष्टेन वाऽनेन भवितव्यम्। तथाहि अतिदवीयस्तया प्रपातस्य अल्पशेषजीवितोऽयमामीलितलोचनः मुहुर्मुहुर्मुखेन पतति, मुहुर्मुहुरत्युल्बणं श्वसिति, मुहुर्मुहुश्चञ्चुपुटं विवृणोति, न शक्नोति शिरोधरां धारयितुम्। तदेहि, यावदेवायमसुभिर्न विमुच्यते तावदेव गृहाणेमम् अवतारय सलिलसमीपम्' इत्यभिधाय येन मां सरस्तीरमनाययत् (बाहुल्येन सज्जनानां चित्तानि सर्वदा हेत्वभावेऽपि सौहार्दयुक्तानि, एवं च अतिशयदयाक्लिन्नानि च विद्यन्ते। यस्मात्कारणात् स हारीतः मां कष्टपूर्णामवस्थामापन्नं दृष्ट्वा समुत्पन्नदयः निकटस्थायिनमेकं मुनिकुमारमवदत्, 'एषः असमुत्पन्नच्छदपुटः, कीरशाबकः केनापि कारणेन निकटस्थवृक्षात् परिस्त्रस्तः, अथवा आखेटशीलस्य श्येनवदनात् परिच्युतेन भवितव्यम्। सरसः प्रपतनस्थानात् अतिशयदूरत्वेन स्तोकावशिष्टजीवनः ईषद्विकसितनेत्रः, वारं वारं वदनेन निपतति, पुनः पुनः प्रव्यक्तं/स्पष्टं श्वसिति, भूयो भूयो त्रोटिपुटं विकासयति, ग्रीवां स्थिरीकर्तुं, न समर्थो भवति। अतः आगच्छ,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यावदयं शुकशिशुः प्राणैः न परित्यज्यते, तावदेव इमं शुकशिशुं धारय। जलनिकटं प्रापय', एवमुक्त्वा तेन मुनिकुमारेणाहं कासारतटं प्रापितः)

उपसृत्य च जलसमीपमेकदेशनिहितदण्डकमण्डलुरादाय स्वयमामुक्तप्रयत्नमुत्तानित - मुखमङ्गुल्या कतिचित् सलिलबिन्दूनपाययत्। अम्भःक्षोदकृतसेकश्च उपजातनवीनप्राणमुपतटप्ररूढनवनलिनीदलस्य जलशिशिरायां छायायां निधाय स्वोचितमकरोत् स्नानविधिम्। अभिषेकावसाने चानेकप्राणायामपूतः जपन् अघमर्षणानि प्रत्यग्रभग्नैरुन्मुखो रक्तारविन्दैर्नलिनीपत्रपुटेन भगवते सवित्रे दत्त्वा अर्घ्यमुदतिष्ठत्। आगृहीतधौतधवलवल्कलश्च सहज्योत्स्न इव सन्ध्यातपः करतलनिर्धूननविशदसटः प्रत्यग्रस्नानार्द्रजटेन सकलेन तेन मुनिकुमारकदम्बकेन अनुगम्यमानः मां गृहीत्वा पितुः जाबालिमहर्षेः तपोवनाभिमुखं शनैरगच्छत्–

(सलिलान्तिकं प्राप्य च, एकभागे स्वदण्डकमण्डलू निक्षिप्य, परित्यक्तशरीरस्थिति - प्रयासं ऊर्ध्वीक्रुतवदनं मां स्वयं/आत्मना गृहीत्वा कांश्चिद् जलपृषतान् पीतान् अकारयत्। जलकणिकाविहितसेचनादुत्पन्ननूतनप्राणं मां (तटस्य समीपम् – उपतटं, समीपाऽर्थेऽव्ययीभावः) तटसमीपे उत्पन्ननूतनपद्मिनीपत्रस्य सलिलेन शीतलायाम् अनातपे, स्थापयित्वा, आत्मनः योग्यं मज्जनविधानमकरोत्। स्नानसमाप्तौ च बहुभिः पूरकादीभिः योगस्य चतुर्थाङ्गैः पवित्रः सन्, पापनाशकमन्त्रान् जपं कुर्वन्, सूर्योन्मुखः सद्योऽवचितैः रक्तकमलैः कमलिनीदलपुटेन, षड्विधैश्वर्यसम्पन्नाय सूर्याय पूजां वितीर्योत्थितवान्। स्नानानन्तरं क्षालितशुक्लवल्कलं धृत्वा/स्वीकृत्य, अत एव, ज्योत्स्नया सहितः सायङ्कालिकधौत इव हस्ततलसञ्चालनेन विशदजटः सः, स्नानक्लिन्नजटेन समस्तेन पूर्वकथितेन ऋषिकुमारसमूहेन, अनुस्रियमाणः सन्, मामादाय आत्मनः पितुः जाबालिमहर्षेः आश्रमसम्मुखं गतवान्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7. गङ्गावतरणम्।

गङ्गावतरणं नाम काव्यम् अष्टसर्गात्मकम्। शतषट्कश्लोकात्मकम्। काव्यस्यास्य कर्ता श्री नीलकण्ठदीक्षितः, "भरद्वाजकुल पारावार पारिजातः श्रीमतो नारायणाध्वरिणः पुत्रः, कर्ता काव्यानां, व्याकर्ता तन्त्राणाम्, आहर्ता क्रतूनां, व्याहर्ता सकलनृपसभासु, द्वितीयशङ्कररूपाणां अप्पय्य दीक्षितानां नप्ता, नलचरित्रादि प्रबन्धा" इति प्रसिद्धः। मञ्जुलपदसंनिवेशा विचित्रोल्लेखा रसनिर्भरा विशङ्कटप्रवाहा चास्य साहित्यसरणिः। लघुकाव्यानि कलिविडम्बन - सभारञ्जनादीनि, शिवलीलार्णवं महत्काव्यं च विदुषां मनो हरन्ति। गङ्गावतरणं तदीयं पद्यमयं संगृह्यते, लघुना सन्दर्भेणात्र तदीयाभिर्वाग्भिः।

अद्भुतं किमपि द्वन्द्वमस्तु तन्मम शर्मणे।
स्वस्तिकस्तनुते यस्य सुदृढाश्लेषनिर्वृतिम्॥
सति सह्यसुतातीरे सति त्रय्यन्त शीलने।
गन्तुं निश्चितवानस्मि गङ्गां केनापि हेतुना॥
तपसा लभ्यतां तस्याः तपसश्च कठोरताम्।
पश्यन्वाचा तपस्यामि काव्यसन्दर्भरूपया॥

भगीरथो नाम राजा आसीत्। सः अपरो रविरिव। तेन शम्भुः साक्षात्कृतः। तेन गङ्गा अवतारिता। सदयं सानुरागं च स वसुन्धराम् अभुङ्क्त। स भूतेषु दयालुः, दण्ड्येषु निर्दयश्च। न दण्ड्यं मुमुचे। न वा अदण्ड्यमदण्डयत्। युक्तदण्डः स दयालुरिति पप्रथे। उचितेषु दृष्टिं दिशन्, अनुचितेषु उदासीनः, दुर्जनैः दुर्धर्षः, प्रजाः समम् अपश्यत्। तस्मिन् शासति, सर्वो जनः अपिशुनो गतमत्सरश्च। तथा स नृपो लालयामास प्रजाः क्रीडन्निव हसन्निव। भृत्येषु कदापि कोपो न जातः। जातः कोपो न निगूहितः। निगूहितोऽपि न चिरमास्त कोमलेऽस्य चित्ते।

व्याकरणं - १) व्याकर्ता - व्याख्याता, २)युक्तदण्डः - उचितनिग्रहः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जातु संसदि निषिद्य सुहृद्भिः संलपन्, सगरात्मभवानां पूर्वेषां अपदानमश्रृणोत्। सगरोऽश्वमेधमकरोत्। तस्य तुरङ्गमनुगन्तुं तेन तनयाः विनियुक्ताः। तं शतमखः अपजहार। सगरपुत्रैः महीयं सगिरि - केतु - वनान्ता व्यचीयत। पुनः पितृवचोऽनुसरद्भिः भूयः सिन्धुरेव समखन्यत। सिन्धूदरमार्गेण ते फणभृतां मन्दिरमवतेरुः। तापसस्य कपिलस्य समीपे तं तुरङ्गं ददृशुः। चोर इति तम् अभिद्रवतः तान् तापसस्य हुंकृतिः भस्मताम् अनयत्। सगरस्य पौत्रः अंशुमान् तान् तं च तुरगं विचिन्वन्, तुरगं समेत्य सगरेण सङ्कल्पितमध्वरम् अपूरयत्। तेषां मृतानाम् अंबुना परिपारणं दातुं कोऽभ्युपाय इति स कुलगुरुं वसिष्ठमपृच्छत्। वसिष्ठः शंसति स्म एनां कथाम्।

१) अपदानं – परिशुद्धाचरणम्,

२) शतमखः - इन्द्रः

३) फणभृतां – नागानाम्

४) विचिन्वन् – अन्विषन् / अन्विच्छन्

५) परिपारणं – निवापाञ्जलिम्।

"हिमाद्रेर्ज्यायसी कन्या कुटिलेति। सा स्मरणत एव अघहन्त्री। शङ्कराय वितरितुम् अमर्त्याः तां शिशुं सत्यलोकमनयन्। विबुधोपहृतां ताम् अष्टभिरपि नयनैः द्रुहिणः आकलय्य 'वराकी इयम् ईश्वरं नार्हति परिणेतुम्" इति वाचा निरस्तवान्। कुटिला किमपि आत्मन आर्हन्तीम् अधिकृत्य वक्तुं यदा उद्यता, गर्विता इयमित्युपलभ्य, कमलभूः शापमसृजत् - 'जलरूपा सद्य एव भवती भविता' इति। सा गिरिसुता, तं निग्रहमपि अनुग्रहमाकलयन्ती प्रलयपयोधिभिरिव घोरैः ऊर्मिभिः लोकं तं कवलीकर्तुमुत्पपात। तदा किं विधेयमिति अप्रतर्कितम्। स्थैर्यम् अपोढम्। श्रुतिपाठो मध्येऽर्ध एव विरतः। पद्मभूरपि इतिकर्तव्यतामूढः क्षणं परिबभ्राम। चतुरः स चतुरो निगमान् सेतून् आबबन्ध। सा इदानीं वियद्गता। तां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नागलोकमवतार्य तव पूर्वजेभ्यः अंबु देयमिति वसिष्ठः उपादिशत्। सगरात्मजानां मातुलः सुपर्णो गरुडः। सोऽपि तथैवादिशत्।

१) अघहन्त्री - पापनाशिनी, २) वराकी – मुग्धा।

आशरीरपतनं व्रतचर्यामाचरन्नपि अंशुमान् अभ्रसिन्धुमवतारयितुं न शशाक। तत्सुतो दिलीपः, तत्समानयनकर्मणि योगं न ददर्श। 'यदि त्वं तत्र दृष्टिं निदधासि, नियमादयम् अर्थः सिद्धिमेति' इति सदोगतो वसिष्ठः न्यदिशत् भगीरथम्।

१) सदोगतः - सभां गतः(सदस् गतः)।

भगीरथः करणीयं निश्चिकाय। सेत्स्यतीति यदवादि गुरुणा, सिद्धमेव तत्। परितुष्टाद् गुरोः आशिषं समधिगम्य, सचिवेषु राज्यमखिलं न्यस्य, सुरनदीमुपनेतुं निर्ययौ। दक्षिणसिन्धोः तीरसीमनि, कमपि आश्रमं संपरिकलय्य, देवमम्बुजभवं नियमैरतिमात्रैः आरराध।

१) निश्चिकाय – निस्चिचतवान्।

पूर्वं हेमकुम्भसलिलैः अभिषिक्तः, इदानीं वीतशङ्कम् अहनि त्रिः पयोधेः लवणासु वीचिषु अमज्जत्। चिराभ्यस्तात् राज्यकार्यात्, सद्यो नियन्तुमशक्तः, आश्रमं नगरम्, आसनदर्भान् भद्रपीठम्, उटजं मणिवेश्म, त्रिचतुराणि दिनानि संभ्रमाद् व्यवहरन् अलज्जत। कतिपयैः वासरैः मुनीनपि सः अत्यशेत। मतिमतां किमसाध्यम्? क्रमेण तपसि कठोरे तिष्ठतस्तस्य, सुरसिन्धुनिपातं कांक्षमाणस्य वासरा निमेषा इव, सहस्रं समा वासरा इव अतीयुः।

१) अत्यशेत – (तपसा) अधरीकृतवान्।

ब्रह्मा तं कदाचिदुपसृत्य, दृष्टिपथमप्युपगम्य, अमृतस्नपिताभिः वाग्भिः आह - "अर्थ्यताम्! अभिमतं वितरामि" इति। तत्क्षणं प्रमुदितः क्षितिपालः तन्निशम्य, स्वयमेनं स्तोतुमारभत। "धातः! त्वत्प्रसूतम् अवतो हरेः, हरतो हरस्यापि उपासनाविधिः यदि स्यात,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत्त्वदर्शनपरैः मतिमद्भिः त्वं कियत् कियद् वन्द्योऽसि! त्वादृशा जनिमता शयितव्यं, यत् त्वयि स्वपति, लोको नश्यति। त्वादृशा ननु जागरितव्यं, त्वयि जीवति लोकः पुनः समुदेति। भारतीपरिबृढः त्वं, तव पुरो वागियं परिहासास्पदं न किम्? नृत्यतः पुरहरस्य पुरस्तात् नृत्यतां प्रमथानां स्थितिरिव किल तत्! महर्षेः कपिलस्य हुंकृतेन, मे पितरः भस्मतामुपगताः। तेषां मत्करपुटेन निवापः इह स्वर्गसिन्धुसलिलेषु अस्तु"। ब्रह्मा तथेति प्रतिश्रुत्य गङ्गां पार्श्व एव, प्रदर्श्य, पश्यत एव तस्य, तिरोऽभवत्।

१) अमृतस्नपिताभिः - अमृते अवगाहितैः, २)जनिमता – विधात्रा।

तनुमतीं सुरलोकसिन्धुं पुरः पश्यन् दिलीपसूनुः सिद्धं मनोरथम् अमंस्त।

- ३ -

पार्थिवः तां सुरलोकवाहिनीं स्तुतिभिः प्रणामैश्च प्रासादयत्। जगदण्डमण्डलं वचोभिरेव निमज्जयन्तीव सा जगाद। "अये! मम प्रवाहतरङ्गपंक्तिषु रसातलं प्रविष्टमात्रास्वेव, विध्यण्डरूपः कपालसंपुटः अलाबूफलकर्पर इव विभिद्य पतेत्। मदम्बुसंपातेन तव पूर्वे विधूतकल्मषाः भवन्तु। परं तैः यत्र वत्स्यते, स लोकः मत्पयो - जवात् पथि प्रलीयेत। किं तव तपः फलेत्? महीश! महर्षेः रोषेण ग्लपितान् महीभुजः कानपि समुद्धरन् त्वं यशो लिप्ससे। परं जगत्त्रयीजुषाम् अकाण्डे संवर्तविधानरूपं पातकं नावेक्षसे। गिरिराजमौलिषु मम पयसां भरः उदारः प्रसह्य पतेत्। तेन वेगेन समुत्पतद्भिः शीकरैः चतुर्मुखस्य धामनि दुर्दिनं भवेत्। सोऽपि निजं धाम किमावसेत्"?

१) अलाबूफलकर्परः - अलाबूफलरूपपात्रम्।

"कल्पादौ कियन्तं योगमास्थाय सः आत्मभूः विष्टपत्रयीं ससर्ज? सा कथावशेषा मया क्रियतां किम्? कथं पतामि? वद! विधेः कृतिगौरवम् अचिन्तयित्वा, शरीरिषु करुणां त्यजन्ती यद्यपि अहं पतामि। तदा कुत्र भवान् भवन्निवापाञ्जलिम् आचरिष्यति? अथापि, तव अर्थितस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

साधनाय, मे निखिलं वेगं बलात् निगृह्य पतेयमित्येवास्तु। इमे परिप्लवा मदूर्मयः क्षुद्रतया न मम वचसि स्थिताः। कस्य पुरः पयोजवः प्रदर्शयताम्? गिरा वा निवेद्यताम्?"

"सन्निकर्षे बडवामुखानलो नास्ति। न वा चुलुकीकृतार्णवः स योगी अगस्त्यः। पदे पदे विपद्यमानां भुवमनुचिन्त्य विषादमभ्येमि एकतः। अन्यत्र चिरोपसंभृतां तरङ्गकण्डूमपनेष्यता त्वया नन्दामि। अभ्रेण पथा रसातलं प्रवेष्टुममरावतीं हठात् विशन्त्यां मयि, स्वहस्तार्पितेन चन्दनेन अङ्कितं शचीमुखं पुरन्दरः किं पुनः द्रक्ष्यति? समग्ररंहसां मदंभसां इयमेव मेदिनी पदं भवेन्नाम?"इति वदन्ती सुरापगा क्षणं व्यरंसीदिव।

१) चुलुकीकृतार्णवः - समुद्रं चुलुकमात्रेण आचमनं कृतवान्

२) हठात् – तरसा

३) व्यरंसीत् – विराममगच्छत्।

नृपः तमेव क्षणं लब्ध्वा प्रार्थयत - "त्रिजगन्नियामकः चतुर्मुखः। स एव त्वां ससर्ज। सोऽपि त्वदूर्मिभिः आत्मसंशयं अवापितो यदि, विनश्यतः जगतः का कथा स्यात्? महापगे! तव महात्मतां यद्यपि वेधाः न वेद। न हरिः, न शङ्करो वेद। तथापि पुराणमुखात् कियत्कियत् अहं गृहीतवान्। अतः भवत्याः प्रवाह - अवतरणमधिकृत्य न प्रतिवक्तुमुत्सहे। परन्तु, अंब! दयोर्मयः ते दृशो मयि पतन्तु किञ्चिदिति प्रसादये"।

एवं प्रसाद्यमाना सा भगीरथाय प्रससाद। परं स्वयात्रा नोपपद्यते इदानीमित्येव चिन्तयन्ती जगाद वत्स! यदि मे प्रतिप्रयाणं न ते रोचते, भवत्कृते मया अनेन रूपेण रसातलं प्रवेक्ष्यते।

- मातः! पूर्वेषां जलाञ्जलीन् कथं प्रदास्यामि? प्रवाहरूपं परिहृत्य नीतया भवत्या, तपस्यतो मे किं फलमस्ति?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- अये! यदि तव तथाऽऽग्रहः, अमरावतीं गतां गङ्गां गृहाण। सा किल लक्ष्मीदयितस्य त्रिविक्रम - रूपस्य अङ्घ्रिताडनेन प्रभिन्नात् विध्यण्डात् परिस्रुता। (सापि गां गता गङ्गैव भवेत्)

- मातः! पातुम् अम्भो न भवतीं अर्थये। परः सहस्राः सिन्धवो भुवि सन्ति। न दिव्यम् अम्बु प्रार्थये। ननु वृष्टयः सन्ति। परं तव पावनं पयो लिप्से।

- वत्स! तर्ह्येवं कुरु। याहि भूतलम्। गृहाण भस्मानि। उपयाहि मां पुनः। विधातुः आलयं मम अन्वक् आगच्छ। ततो मज्जलैर्मनोरथं साधय।

- मातः! पितामहानां कपिलस्य अपराधाज्जातं एनः अपनेतुमिच्छामि। तत्कर्मभूमौ भूतल एव साधयितुं शक्यते। अकर्मभूमौ(सत्यलोके) तावकं पयः अधिगत्य, किं मया प्रतिपद्यताम्?

- अये! त्वं वृद्धसेवया सुशिक्षितः श्रुतिस्मृतिभ्यामुपदर्शिते पथि। बलात् माम् अकर्मभूमौ अहिराजवेश्मनि वा विकृष्य किं विधित्ससे?

- अम्ब! त्वदुक्तिधारया समम् उत्तरोत्तरं वक्तुं न ईशे। गुरोर्निदेशः तथा। मम स दुस्त्यजः। कुतः तम् उत्सादयितुं प्रवर्तसे?

१) न ईशे – न शक्नोमि।

- वत्स! यदि गुरुशासनं त्वया अलङ्घ्यं, मम भूमौ अवतारणे यतस्व। तावत्, स्मृता स्मृता सन्निदधामि।

एतावत् तमुदीर्य दिव्यनदी तिरोदधे। अभ्रनद्या गिरं विचिन्तयन्, आयतम् आयतं निःश्वसन्, प्रजेश्वरः प्रस्तुतस्य कार्यस्य सिद्धये सर्वाणि जगन्ति चेतसा जगाम।

देवा नात्र प्रभवेयुः। असुरापशदस्य कस्यचिद् विक्रमप्रसङ्गेऽपि ते मूर्च्छन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सुराग्रजो ब्रह्मा जगन्ति निर्माति। एनामेव कुटिलां नदी भवेति शशाप। परं तस्या दुर्विनयस्य उपमर्दने जराजर्जरित इव न स प्रभुः। तया पुरा अभिद्रुतः भीषितश्च।

१) जराजर्जरित – वृद्धत्वेन।

किं हरिः वियन्नदीं सहेत? अयं साहसी, सहिष्यते। विध्यण्डपुटेऽपि पदं समुत्क्षिपन्, आवरणोदकैः नदीं ससर्ज। अयम् अर्णवोदरे चिरं मग्नः पुराणीः गिरः वेदाख्याः स्वयमाहरत्। सुधाब्धिमद्रिणा निर्मथ्य सुरानमृतैः अतोषयत्। अर्णवशोषणे अमुं पुमांसं परिहृत्य कोऽपरः प्रवर्तताम्? शतयोजनावधिः सेतुः अमुं विना केन महोदधौ अबन्धि? पुरा वराहो भूत्वा स्वदंष्ट्रया मन्दरादिभिः महीधरैः साकं वसुन्धरामयमवहत्। यदि वैष्णवं कर्म विचारयामः, त्रिषु विष्टपेष्वपि न किमप्यसाध्यं तस्य। नदी सा कीदृशी वा भवतु। उपायवेदी मधुकैटभाहितः। न देवताभिः, न मृगैः, न मानुषैः, न वा आयुधैः, यस्य नाशनं संभवि, तं हिरण्यकशिपुमपि प्रतिघ्नन् स मायी किं किं न साधयेत्?

१) उपायवेदी – कर्तुम् अकर्तुं वा जानाति।

जलन्धरे अन्धके त्रिपुरे स्मरे च शिवस्य विक्रमः प्रथित एव। परं बाणासुरसङ्गरे तस्य पराक्रमः क्षत इत्यपि पुराणं वदति। अतो न किञ्चिद् व्यवसातुमीश्महे। कूपमण्डूकनिभा नृणां मतिः। देवतातत्वविचारे चातुरी अन्यादृशी। क्षीतीशो ध्यानमास्थितः।

विधिः तस्य पुरोऽभवत्। स जगाद - वियन्नदी महेशस्य पुरतः कियती? कियन्ति सर्वाणि जगन्ति? दक्षाध्वरशिक्षणादयः तस्य अंशलेशावतरस्य केलयः। पुरा मुकुन्दाय तपस्यते तेन वरो दत्तः। तं बाणपुरे अपालयत्। यदस्ति, येन विश्वं क्रियते, येन यतः तद्विश्वमभूत्, यत्र तत् लीयते, येन तथाऽनुगृह्यते, ततोऽप्यतीतं तदैव हि दैवतम्। ईशानहरीन्द्रवेधसां प्रसूतिः सः। स एव वन्द्यः प्रथमम्। तस्मादेव श्रुतयो जज्ञिरे। प्रभुं प्रशान्तं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमेश्वरं तं भणन्त्युपनिषदः। स विश्वाधिकः। स सर्वज्ञो देवः शशिखण्डमण्डनः। इति क्षितीशं प्रतिबोधयन्, ब्रह्मा शिवानुध्यानाय यथाविधि तमचोदयत्।

प्रतिप्रयाते जगतां पितामहे भगीरथः पूर्णमनोरथः तपश्चरिष्यन्, पिनाकिनः श्वशुरं गिरिमुपजगाम।

- ४ -

स बाह्यं करणग्राममनुगन्त्रीं मानसीं वृत्तिमाकृष्य, मदनान्तके वृत्तिमाधत्त। इयता क्रमितुं शक्या मयेयमिति दर्शयन्, चरणाङ्गुष्ठरेखया भुवमाक्रम्य तस्थौ। न फलेषु न मूलेषु नाप्सु च प्रीतिमान् अभूत्। स्वात्मानन्देन सुखितः, सस्नौ, जजाप, दध्यौ शिवं सदा, तस्य कथाभिः जजागार शर्वरीः। पञ्चषा मासा गताः। महान्कालो गतः। तस्य दारुणं तपः परिपाकोन्मुखम्। पदे पदे प्रसन्नानि निमित्तानि प्रादुरासन्। विकचाम्भोरुहां वापीं विमलम् इन्दुमण्डलं च स्वप्नेषु पश्यन् राजर्षिः सिद्धं मन्त्रममन्यत। सन्ध्यासु शुश्रुवे तेन शम्भोः डमरुकध्वनिः। सन्ध्यासु ईशनटनं दिदृक्षतो देवानपश्यत्। तिरोहिताः प्रमथाः तं तत्र प्रत्यहं पश्यन्तो देवं विज्ञापयामासुः।

तावतः तपसः उचितं फलं तस्मै दातुं हरः प्रतस्थे, तं द्रष्टुं, अधर्मण इव ह्रिया। संव्यानमुपरि न्यस्य, पुरो वलयानुत्सार्य अम्बिकैव आऽन्तःपुरगृहद्वारं करं ददौ।

अचिन्तितम् उपनिष्क्रामन्तं तमालक्ष्य किमेतत्? इति संभ्रान्ताः गणाः तं परिवव्रुः। हरः आलयद्वारमतिक्रम्य वृषमारुरोह। अम्बाऽपि संभ्रमेण आसन्नायाः सख्याः करमालम्ब्य शनैः पादारविन्दविन्यासैः मेदिनीं पावयामास। अनालम्ब्य सखीहस्तं, अनाक्रम्य च पादुकां, महेशस्य सन्निकर्षं सा शनैः शनैः जगाम। सख्याः कुञ्चिते जानुमण्डले सव्यपदं कृत्वा, शम्भोर्हस्तमालम्ब्य वृषमारुरोह।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१) संव्यानमुपरि – नारीणां कट्याः ऊर्ध्वभागस्य आच्छादनवस्त्रम्।

कुतः प्रतिष्ठते देवः? कुत्र च गच्छति? इति गणाः पाणिभिर्नयनान्तैश्च पप्रच्छुः इतरेतरम्। वाहनस्थो महेश्वरः, भक्त्या भारेण भुग्ने नन्दिनः पुण्ये शिरसि वामं बाहुमस्थापयत्। वाहनारोहेण विस्रस्तात् कपर्दान्तात् विलम्बितं चन्द्रं ग्रहीतुम् उद्बाहुः स्कन्दः अन्तिके व्यचरत्। विचित्यापि प्राक् अलब्धं शूलिनः पादं मौलिं च पश्यन्तौ चक्रायुधचतुर्मुखौ पार्श्वे जग्मतुः। प्रशान्तं पावनं तत् राज्ञः तपोवनं प्राप्य, तपस्यतो भगीरथस्य पुरतः पुरशासनः तस्थौ।

१) भुग्ने – विनम्रे।

भगीरथः दृशौ उन्मीलयन् पुरतः अप्राकृतं महः किञ्चिदद्राक्षीत्। तस्यान्तः तरुणेन्दुशिखामणिं निगमैरप्यदृष्टं दृष्ट्वा साध्वसाद्भुतसम्भ्रान्तः न किञ्चित् प्रत्यपद्यत। प्रदक्षिणीकृत्य धन्येन मूर्ध्ना तस्याङ्घ्रिपङ्कजं मुहुः पस्पर्श। आत्मार्हैः फलपुष्पाद्यैः आनर्च। क्वाहं, क्व शम्भुरिति विमृशन्नपि तमस्तौषीत्। ईश्वरः प्रीतो व्याजहार – तात! तपसा प्रीतिजुषो मत्तः कांक्षितम् अर्थ्यतामिति। भगीरथ आह –त्वदाज्ञया मया कांक्षितमर्थये। तपसा गङ्गा आराधिता। मया तस्या अवतरो याचितः। सा स्वाम्बुवेगसहं कञ्चित्प्रत्ययाचत माम्। अस्मिन् अनन्यसाध्येऽर्थे व्यापर्तुमुचितं तव। अत्रोदाहरणं मुख्यं हालाहलविनिग्रहः। ईदृशमायासम् अर्थितवानहं क्षन्तव्यः इति वदन् प्रणनाम। "तात! अभिषेकप्रिया वयम्। त्वया प्रियमेतत् कृतम्। नापराद्धं त्वया" इत्यभिधाय वृषात्तूर्णमवरुह्य बालकौ गणेशस्कन्दौ अपसार्य, वैयाघ्रं चर्म आबध्य सावष्टम्भः तस्य पुरतः निर्मले स्फटिके तले निषसाद। सावलेपं नभसः सिन्धोः संनिपातं ग्रहीतुं नागेन्द्रग्रथिताः प्रभोः जटाः नन्दी विस्रंसयामास। एकतः भगिन्याः समागमाय उत्सुका शिवा। अन्यतः तदद्भुतदिदृक्षया आकुलाः प्रमथाः। स्वमनोरथः सेत्स्यतीति कुतुकी नृपः तत्र। सर्वे तं क्षणं प्रतिपालयन्ति।

१) दृशौ – अक्षिणी, २) सावष्टम्भः - धैर्ययुक्तः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्रिपुरशासनः प्रान्तसंक्रमितदृशा पश्यति। भगीरथः ध्यानयोगविधिना सुरनदीम् अस्मरत्। सा तु अहंकृता मनसा संभृता, संभ्रमेण सर्वतः चिरनिरोधेन लज्जितम् ऊर्मिमण्डलम्, अवतरणाय सज्जतामनयत्। निर्गच्छामीति निवेदयितुं विधेः सन्निकर्षं सा उपजगाम। अवधीरणव्यक्तेन गर्वगरिम्णा ऊष्मलया गिरा व्याजहार – देव! अहो! नन्वयम् अयुग्मलोचनः स्फाटिकाचलचरो वनेचरः! स नाम मामकं पयो धर्तुमिच्छति। तस्य महारयः त्वयैकेन परीक्षित चरः। ततो दृश्यते प्रकामजरठो मे पिता। सा च मुग्धहृदया यवीयसी। यदि मे समुद्यमो न व्याहतः, क एष शिवः? क इव राजतो गिरिः? सर्वं दृष्टिपथादपेयात्। अहं तु त्वद्गृहे चिरात् स्थितवती। अनेनावतरणेन त्वां परितोषये।

१) गर्वगरिम्णा ऊष्मलया गिरा – सगर्वेण उष्णयुक्तवाचा।

त्वच्छिरसो लवनकर्मण दुर्मदमेनं गिरिशं वेगेन रसातले निपातयेयम्। तव तोषो नु? मदूर्मिसंप्लवेन कवलीकृतो हरः, पयसि शङ्खशुक्तिभिः सङ्गतो भवेत्। नन्दी तं गवेषयिष्यति। मामकं प्रकृतिदुर्मदं पयः किमिव मन्यते? कालकूटमिव वा? यदि शङ्करे दयसे, अधुनापि तं ब्रूहि, अपसर, मम मार्गे मा तिष्ठेति। मम यवीयसी पुनः मा विषीदतु। यदि भवानेव जगतोऽकाण्डविप्लवो मा भूदिति मां याचते, तर्हि मदम्बुवहनेऽतिमानिनं तं हरमेकं शमयामि। जगत् तिष्ठतु कामम्। त्वं मदम्भसां चलतां गर्जितानि वेत्सि। तत्त्वतः कथय - "शिवः किं भवेत्?" इति। ब्रह्मा त्रस्त इव। सा देवानाह परितः स्थितान् "मा परित्रसत! मामकं पयः युष्मासु बलदर्शने लज्जते। यूयं यात! अपयात! निजनिजालयान् यात! पयसो वेगं वीक्षितुं कौतुकं यदि, निर्भया दिशां कोणमावसत!"

त्रासिता अमराः पिनाकिनः पार्श्वमापुः। आपगायाः गिरः गदितुमुद्यतान् तान् स्वतेजसा स्तम्भितान् आकलय्य चन्द्रशेखरः अन्तरस्मयत। सदसः संनिवृत्य बहिः एकः तस्थौ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आपगाऽपि जगदाक्रमोद्यता। श्रुतिमयाः सेतवः समन्ततः उल्लङ्घिताः। युगान्ते अर्णवैः प्राक् क्रियमाणः संप्लवः इदानीमुपक्रान्त इव।

सत्यलोकगताः तपस्विनः, जानुं प्राप्य, ततो नाभिमपि अतिलङ्घ्य अम्भसि कण्ठदघ्ने, अशरणा अक्रन्दन्त। प्राण संयमशिक्षया कतिचिन्महर्षयः न मज्जिताः। सौधवलभीगता शारदाऽपि सहसोत्थिता उद्गृहीतकरपुस्तका, भयात् क्षणं क्षणं युगपदक्षिपत्। पद्मभूः नूत्नतया विश्वसर्गचतुरोऽपि तत्र न किञ्चन प्रतिव्यधित। यः कोऽपि परापदि कुशलः स्वैरमस्तु। स्वापदि अखिलो जनः अकुशल एव। स्वीयसदनभित्तिपर्वसु सर्वतः फेनिलाः सलिलशोषरेखिकाः दृशा दीनया, आयतश्वासितं, आनमन्मुखं पश्यति स्म। "कुतो वा पूर्वमेव आनलं मन्त्रं नाजपम्? कुतो वा अभितः तटीः नासृजम्? इति गते जले विधिरखिद्यत। सा किल अग्रजन्मनां प्रकृतिः।

१) कण्ठदघ्ने – कण्ठपर्यन्तजले

२) सौधवलभीगता – हर्म्याग्रपदगता,

३) सलिलशोषरेखिकाः - जलशोषणतः व्यक्तरेखायुक्ताः

४) प्रतिव्यधित(प्रति+वि+धा+लुङ्) प्रतिबिदधाति स्म।

सत्यलोकात् इन्द्रपुरं प्रति गन्तुमभ्रगङ्गया निश्चितं पश्यन् मुनिगणः हसित - बाष्पकर्बुरैः आननैः "अद्य जीवितमिव" इति दूरचालितैः हस्तैः प्रादर्शयत्। स्वेच्छया विहरन्तः सुधान्धसः वियत्सरितः आप्लवं दृष्वा अकाण्डे प्रलयमागतम् आचचक्षिरे। अतर्कितागता सा वियद्गङ्गा शचीपतेर्नगरमाकुलं चकार। ततो महेशितुः मस्तके निपतितुं संस्तवं विदधतीव वैजयन्तशिखरे संपपात। सा ततः प्रचलिता निरवशेषम् अम्बरं व्यानशे। तल्लहरिवल्लर्या हृताः सुराः सुरगजाः तदीयजलजन्तवश्च नन्दनोपवनपादपैः समं पेतुः। आविरिञ्चिगृहम् आहिमाचलं तदूर्मयो निर्मला रुरुचिरे। तदूर्मिमारुतः पूर्वमेव शङ्करकपर्दकन्दरं प्राप्य संभ्रमन् उच्चैः क्रोशति स्म, सुरसिन्धो मा पत इति। एका तस्याः तरङ्गरेखा शिवपार्श्ववर्तिनीं सानुरागं सबहुमानमानतां शिवां पाणिनेव मृदुलं परामृशत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१) सुधान्धसः - अमृताशनाः देवाः

२) आचचक्षिरे –(आ+चक्ष्+लिट्) अकथयन्

३) व्यानशे –(वि+अश्+लिट्)सर्वत्र प्रसृता।

हरः ईषदुन्नमितकन्धरः कोपलेशेन परुषैः, अवज्ञया कूणितैः, विलोचनाञ्चलैः पतनोन्मुखीं तां पश्यति स्म। मिषतां दिवौकसां विस्मयाय तां द्रष्टुमुन्नमिते शिरसि सा सरिन्निपपात। केयम् आर्द्रयति मद्गुरोः शिरः? तां निखिलाम् अहं ग्रसेय इति गजाननः करम् उच्छ्रितमकरोत्, शिवः सत्रपं तं हुंकारेण न्यवारयत्। अप्रतर्क्यम् असमीक्षितावधिं तं पिनाकिनः कपर्दवलयं दिविषदामापगा अवाङ्मुखी पन्नगी कलशमिव, समाविशत्। तज्जटासु विशती वियन्नदी कियत्पथम् अमरैः अदृश्यत, तदनु तज्जलारवोऽश्रूयत, ततः परं न किञ्चितुपालभ्यत।

१) विलोचनाञ्चलैः - नेत्रप्रान्तैः

२) मिषतां – पश्यताम्।

तस्य जटापटलकन्दरोदरे स्वीकृताः सुरनदीमहोर्मयः लेशतोऽपि नाललक्षिरे। मुहुः आहितभ्रमा सा तस्य मूर्ध्नो निर्गन्तुं पदवीं न लेभे। शिवस्य जटाः नयनाग्निभिः तापिता इव। जटासु पतिता सरित् क्लेदमात्रावशिष्टा। सर्वं जातमिति समीपवर्तिना नन्दिना सविनयं निवेदितः शिवः, अमरापगायाः सलिलसेकेने सान्द्रीकृतं कपर्दं सविभ्रमं व्यधुनोत् सव्येन पाणिना, पुनस्तं पन्नगैः परिबबन्ध।

- ६ -

भगीरथः गिरिशस्य जटाभिः पीतां देवसिन्धुं विलोक्य प्रथमं विसिस्मिये, ततो विव्यथे च। चिन्तयामास च –"तुष्टो विरिञ्चो गङ्गामनुमेनेऽवतर्तुम्। शम्भुः प्रससाद तां धर्तुम्। लब्धा गङ्गा। इदानीं जटानां वलया आराधनीया वा? न कार्यसिद्धिर्जाता। पुनर्यतिष्ये। तपसामसाध्यं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किमपि विद्यते वा। तप्स्ये"। इन्दुमौलिं पुनः प्रपेदे। "भगवन्! कल्पावसाने चतुर्दश भुवनान्यपि त्वयि लीयन्ते। तेष्वेकेयं वेधसो गृहदीर्घिका । सा वराकी यदि लीना त्वयि, का ते स्तुतिः? भक्तैः शङ्खाम्बु दत्तं सहस्रधारं त्वं मन्यसे। अभ्यर्थये त्वाम्, अथवा स्तोष्ये ता एव जटाः। जटाः! नमो वः। चिराय रूढां पिपासामियतीं रुध्वा स्थिताभिः युष्माभिः वियत्सरित् अलिह्यत। ललाटानलतापितानां भवतीनां वियन्नदी पानोदकं किन्नु? भक्तार्पिताभिः कियतीभिरद्भिः न तृप्ता वा? ईषन्मह्यमपि विसृजत"।

तस्य स्तुतिभिः आशुतोषः स तुतोष। तां नदीं मोक्तुम् आनमनानभिज्ञं मूर्धानम् ईशः नमयाम्बभूव। निर्गन्तुं ह्रीणेव अवाङ्मुखी सा सरित् बिन्दुशः बिन्दुसरसि ततोऽपतत्। ता गर्वोक्तयः क्व गताः? न विद्मः। सा सिन्धुः सरसि क्षरन्ती सप्तस्रोतांसि स्वयमाबभार। त्रिभिः प्रतीचीम् आववार। त्रिभिः इन्द्रगुप्तां दिशम्। भगीरथः शिवम् आनतेन मूर्ध्ना प्रणम्य स्यन्दनमारुह्य संप्रस्थितः। तमेकं स्रोतोऽन्वयासीत्। पुरस्तात् स शताङ्गः, पश्चात् तेन आकृष्यमाणेव गङ्गोर्मिः। क्वचित् पतन्ती, क्वचिद् उत्पतन्ती, क्वचिद् उत्पथेन यान्ती, परितः स्पृशन्ती, पर्यङ्कतले गात्राणि लुठन्ती, स्वकौमारविहारकाले दृष्टानि नीहारगिरेस्तटानि कौतुकेन द्रष्टुमिव, सर्वतः समारुरोह, अवारुरोह च। "शङ्करेण मयि ग्रस्तोदकायां किं नाम त्वं मह्यं कृतवानसि। नाहं ते सुता। न त्वं गुरुः" इति क्रुद्धेव हिमाद्रिं जहौ।

१) आशुतोषः - आशु तुष्यतीति शिवः

२) आववार –(आ+वृ+लिट्) आच्छादयत्।

जह्नुः तत्र आरब्धयज्ञः। तस्य अभ्यर्णम् आलोकितुम् आदृतेव, अन्तः प्रविष्टा "देवाः हविः कियत् कियत् लभन्ते? किमपि मम ग्रसितुं नार्हं वा?" इति सर्वं हविस्त्वेन जग्राहेव। तमपि जह्नुं मज्जयामास जले तदीये। सा प्रकृत्या कुटिला, पुरारेर्मकुटे पुरा दुर्विनीतेः फलं लेभे। भूयोऽपि सैव जह्नोः अपचकार। तां लीलयैव आपिबति स्म स मुनिः। "जातैव द्यां नीता विबुधैः। वेधसा शप्ता निरुद्धा च। शिवेन ग्रस्ता, अधुना जह्नुना पीता। एषा कस्मिन्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्षणेऽजायत, न प्रतीमः। कन्या तवेयं भविता। विमुञ्च एनाम्" इति देवैर्याचिते, जह्नुः जहौ कर्णपुटेन। भगीरथस्य रथः पुरो गच्छति। सापि तमनुव्रजति। प्रायेण धाटीग्रहप्रसक्तौ बालाविव केलिपरौ तावास्ताम्। गां गतैषा गङ्गा। जह्नोः सुतेति जाह्नवी।

१) अभ्यर्णं – समीपम्।

यं यं प्रदेशं पावयितुं सा नदी प्रवर्तते, तस्याः पुरः एव तदूर्मिवाताः तं तं पुनन्तः, तस्यै किञ्चिदपि नावसरं ददुः कदाचिदपि। सगर्वां गतिं परित्यज्य अम्भोभरैः मुनीनामाश्रममण्डलानि संप्लावयन्ती, आत्मनः पापजिहासयेव मणिकर्णिकासु गङ्गा स्वयं ममज्ज। विश्वेशं विनयपरिष्कृता ववन्दे।

१) जिहासा – हातुमिच्छा।

- ७ -

भक्तिशालिनो मुनयः चिरादुपयातां मातरमिव जाह्नवीमुपगम्य तनया इव वाग्भिः उपतस्थिरे। "दिश देवि सुतान्! दिश स्त्रियः! दिश भोगान् इति नार्थयामहे। इदं वपुरेव जहिमः। तदिदानीं गृह्यताम्। इत्येव नो मनोरथः। दिश नः प्रणतैव वाञ्छितम्। यदि यशो लिप्ससि, अस्मद्वपुरन्तमपि इहैव प्रतीक्षस्व"। भगीरथोऽपि मुकुटनिवेशिताञ्जलिः प्रणतशिवङ्करं हरं स्तुवन्, क्षणगमनोपरोधतः जाह्नवी तटात् प्रतिचलेदिति भिया न्यवर्तत।

१) लिप्ससि –लब्धुमिच्छसि ।

- ८ -

काशिकापुरीं समतिलङ्घ्य भगीरथः पुरतः प्रचचाल। सरयूरपि पथि पुनः स्वयमेव समागता। सा जनपददर्शनेन परवशामिव सखीं क्षणात्ततः परिचकर्ष। किमयं सरिताऽनुसृतः भयात्पलायते? उत हठात् तया ह्रियते इति पथि जानपदा जनाः सविस्मयमूचुः। तावान्वेगो रथस्य, तदनुगाया नद्याश्च। पथि विलम्ब्य विलम्ब्य पदे पदे, गिरिगुहासु निलीय निलीय च,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्ततः नववधूरिव नर्मसखस्य, मकरालयस्योपान्तिकम् उपजगाम कथञ्चित्। अनशनव्रतकर्शितस्य कुम्भभुवो मुनेः सलिलपारणायापि संशयितमिव अम्भस्तत्र। तथा जलनिधेः सविधे बिलमेकमदृश्यत। तेन प्रविष्टो भगीरथः सगङ्गः नागालये विविक्तमनोरमं भगवतः कपिलस्य तपोवनमासदत्। कपिलकोपहुताशानसंभृतं पितृभस्म तत्पुरतो निरीक्ष्य हर्षशोकमूर्छितः, द्विविधमश्रु दधौ।

१) नर्मसखस्य – क्रीडासुहृतः।

अथ रथादवतीर्य भगीरथे सगरजान् वीक्षितुमुपसर्पति, तदनुगा भगवती सुरलोकतरङ्गिणी भसितराशिं अमज्जयत् अम्भसा। तत्क्षणनिर्हृतकल्मषैः सगरात्मजैः, दिवि यदास्त सुरौकसां पदं, तदपि अपहृतम्। ते पितरः प्रथमं सुरनदीजलपानगलत्तृषः, पश्चात् भगीरथेन अपवर्जितम् अम्भसाम् अञ्जलिं सुतवत्सलाः पपुः। इदानीं परिपूर्णमनोरथः नदीमवगाह्य क्षितिपतिः निर्गतः मृदुगभीरपदां दिविषदां स्तुतिमशृणोत्।

"श्रुतिगिरोऽपि यं विविच्य विविच्य परिश्रमे विफलाः, तमेव महेश्वरं समुपलभ्य तं गङ्गावतरणार्थे नियोजयितुं क इव नाम प्रभुः त्वां विना। कपर्दपथं गतां तां को वा कर्षेत्। सगरात्मजाः दिवमभजन्त। शोषितः सिन्धुरयमपूर्यत। तदखिलं तात! तव तपोबलात्। सुतार्थिनस्ते सरिदियमादिमा सुताऽस्तु भागीरथी"।

ततः वियन्नदीं समामन्त्र्य, गतक्लमः तदम्बुसंपातपथेन बिलादुद्गतः पयोधेः तटमाप। चमूसमेताः तदीयाः सचिवाः नृपतेर्निवृत्तिं प्रतीक्षमाणाः तं सलिलाद् उत्पतन्तमपश्यन्। तमुपसृत्य पौरैः अहं - पूर्विकया प्रणेमे। तदग्रे विन्यस्ताः महान्तः उपहाराः। तान् दृष्ट्याऽनुकम्प्यान् सम्बभाषे। सम्भाषितव्यान् पुनः आलिलिङ्ग। आलिङ्गितव्यान् प्रणनाम। प्रधानैः सचिवैः पृष्टः स्वमुदन्तं संगृह्य उदाजहार। जटा विस्रस्य, मौलिं मुक्तादामभिः जग्रन्थ। आभूषणैः भूषयामास। भेर्या मुखरया, आनकध्वानेन, दुन्दुभेर्गर्जनेन, विषाणिनां बृंहितेन, अश्वैर्गजैः रथैः पदातिभिः परीतः, च राजचिह्नैः उपसेव्यमानः शनैरयोध्याभिमुखं प्रतस्थे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सुधाभिः आलिप्तहर्म्याग्रपदं, हेमध्वजलोभनीयं, संमृष्टरथ्यं तन्नगरं प्रविवेश। मङ्गलतूर्यघोषैः जनानामाशीर्वचोभिश्च समं, शतशः सौधाधिरूढैः अवरोधैः दृश्यमानः स्वसदनं विवेश। स्मेराननाः स्मेरमुखारविन्दं तमभ्युपेयुः, परिवव्रुः, पादयोर्निपेतुः, दीर्घं परिरभ्य मुखैस्तस्य मुखं चुचुम्बुः। चिरविप्रलब्धाः, तदागमनं तदापि नैव विशश्वसुः। आवेधोगृहम् आरसातलं स्वं नाम विश्रावयन् स समस्तां भुवं बुभुजे।

१) हेमध्वजलोभनीयं – स्वर्णध्वजेन मोहनीयम्।

कविः प्रथितो वक्रोक्तौ। हृदयतलङ्गमा सा सहृदयान् आप्लावयति मोदमन्दाकिन्याम्। तस्या उपहृताः केचन शीकराः अत्र प्रोक्ष्यन्ते। यद्यादरः उत्साहश्च, तदीयं गङ्गावतरणं साक्षावगाह्यताम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

८. अष्टाङ्गहृदयम्

(आयुर्वेदग्रन्थः, रचयिता—श्रीमद्वाग्भटः)

(दिनचर्या नाम द्वितीयोऽध्यायः)

कतिपयसूत्राणि

१) ब्राह्मे मुहूर्ते उत्तिष्ठेत्स्वस्थो रक्षार्थमायुषः।

मुहूर्तः=नाडिकाद्वयम् (=घटिकाद्वयम्)।रात्रेः चतुर्दशो मुहूर्तो ब्राह्मो मुहूर्तः। सर्वस्मिन् काले रात्रेः चतुर्घटिकावशेषे समुत्थानं कार्यम् ।(प्रायः प्रातः4.30AM) किम्भूतः उत्तिष्ठेत् ? स्वस्थः=अनातुरः। "समदोषः समाग्निश्च समधातुमलक्रियः। प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते॥" इति स्वस्थलक्षणम् । किमर्थम् उत्तिष्ठेत् ? आयुषः रक्षार्थम् । आतुरेण धातुसाम्यर्थं स्वप्तव्यमेव।

२) शरीरचिन्तां निर्वर्त्य कृतशौचविधिस्ततः॥(१)

अर्कन्यग्रोधखदिरकरञ्जककुभादिजम्।

—

दन्तपवनं दन्तमांसान्यबाधयन् ॥(३)

शरीरस्य चिन्तां निर्वर्त्य=निष्पाद्य ततः मूत्रपुरीषादेः कृतशौचविधानः तदनन्तरम् अर्क - न्यग्रोध - खदिर - करञ्जक - ककुभादिजं दन्तकाष्ठं (द्वादशाङ्गुलपरिमाणं, कनिष्ठिकाङ्गुल्यग्रवत्स्थूलं) उपयुज्य कूर्चिकाग्रं यथा, तथा भक्षणपूर्वकं दन्तधावनं कर्तव्यम् ।

३) सौवीरमञ्जनं नित्यं हितमक्ष्णोस्ततो भजेत् ।

दन्तधावनानन्तरं सौवीराख्यमञ्जनं नेत्रयोः नित्यं भजेत् । मृदुचूर्णाञ्जनत्वात् तिस्रः शलाका मानम्। एतदञ्जनं सिन्धुसम्भवं, दाहकण्डूमलघ्नं, दृष्टेः क्लेदरुजापहञ्च।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४) चक्षुस्तेजोमयं तस्य विशेषात् श्लेष्मतो भयम्॥ (५)
योजयेत्सप्तरात्रेऽस्मात्स्रावणार्थं रसाञ्जनम् ।

यद्यपि पञ्चमहाभूतात्मकं सर्वमपि, तथापि बाहुल्येन व्यपदेशात् तेजोमयमुच्यते। चक्षुषो वातपित्ताभ्यामपि भयमस्ति, विशेषेण तु कफाद्भयम् , ततः रसाञ्जनं योजयेत् । "निशायां तु ध्रुवमञ्जनमिष्यते" इति चरकेण अञ्जनस्य रात्रिः काल उक्तः। इह तु दन्तधावनानन्तरमिति प्रातःकाल उक्तः। अतः पूर्वाह्णे रसाञ्जनं, निशायां तु नित्यसेव्यमञ्जनम् इति अविरोधः।

५) लाघवं कर्मसामर्थ्यं दीप्तोऽग्निर्मेदसः क्षयः।
विभक्तघनगात्रत्वं व्यायामादुपजायते॥ (१०)

शरीरायासजनकं कर्म व्यायाम उच्यते। व्यायामाद् लघुत्वं, कार्यनिपुणत्वं, जाठराग्नेरुत्तेजनं, मांसक्षयः, सुसन्निविष्टदृढावयवत्वं च उपजायते। तस्मात् तं कुर्यात्।

६) तं कृत्वाऽनुसुखं देहं मर्दयेच्च समन्ततः॥ (१२)
व्यायामं कृत्वा यथा शरीरे बाधा न स्यात् तथा देहं परितः मर्दयेत्।

७) दीपनं वृष्यमायुष्यं स्नानमूर्जाबलप्रदम्।
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मजित् ॥ (१६)

स्नानम् उत्साहं, प्राणं च प्रददाति। 'खर्जू , त्वगुपलेपः, आयासः, घर्मः, आलस्यं, पिपासा, दह्यमानवद्दुःखं, पापम्'—एतान् जयति। स्नानप्रभावात् अन्तरूष्माणसंवर्धनत्वं, प्रहर्षो ततः शुक्रवर्धनत्वम् , आयुष्मत्वं च भवति।

८) उष्णाम्बुना अधःकायस्य परिषेको बलावहः।
तेनैव तूत्तमाङ्गस्य बलहृत् केशचक्षुषाम्॥ (१७)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उष्णाम्बुना अधःकायस्य परिषेकः प्राणकृत्। तेनैव शिरसः परिषेकः केशचक्षुषां बलहृत्। तस्मात् केशचक्षुर्बलार्थिभिः शीतोदकेन स्नातव्यम् , इतरैः उष्णोदकेन। न तु एकस्मिन् स्नाने शीतोष्णयोः प्रयोगः, क्रियासङ्करदोषापत्तेः।

९) जीर्णे हितं मितं चाद्यान्न वेगान्नीरयेत् बलात्।
नवेगितोऽन्यकार्यः स्यान्नजित्वा साध्यमामयम्॥ (१९)

पूर्व आहारे सम्यक्परिणते भुञ्जीत। देशकालाद्युचितं यथोक्तमात्रम् अद्यात्। वेगाः— वातविण्मूत्रादयः, तान् बलात् न प्रवर्तयेत्। सञ्जातवेगः सन् तं साध्यं रोगमजित्वा अन्यकार्यो न स्यात् , वेगानेव उत्सृजेत्। साध्यो हि उपेक्षितो दुःसाध्योऽसाध्यो वा स्यात् ।

१०) - - - तस्माद्धर्मपरो भवेत्। (२०)
भक्त्या कल्याणमित्राणि सेवेतेतरदूरगः।

सुखार्थः धर्मपरो भवेत्। धर्मसहकृतात् चिकित्सादेव सुखं(आरोग्यं), इत्यनेन धर्मस्य आयुर्वेदाङ्गत्वम्। शुभकर्मणिउपदेशादिना सहायकान् अदम्भमतिः सन् भजेत्।इतराणि पापमित्राणि वर्जयेत्।

११) त्रिवर्गशून्यं नारम्भं भजेत्तं चाविरोधयन्।
अनुयायात्प्रतिपदं सर्वधर्मेषु मध्यमाम् ॥ (३०)

त्रयाणां धर्मार्थकामानां वर्गः - त्रिवर्गः।तेन रहितं उद्यमं न भजेत्। तं च परस्परमबाधयन् भजेत्।

सर्वेषु आत्मकृत्येषु रागद्वेषरहितां बुद्धिमनुसरेत्। अर्थात् ,मध्यस्थः सर्वान् धर्मान् अनुतिष्ठेत्।

- - -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

9. अकारान्तः पुल्लिङ्गः 'राम' शब्दः

I. प्रथमा विभक्तिः - सु — औ — जस्

१. राम इति प्रातिपदिकात् प्रथमाविभक्तौ एकवचनप्रत्यययोजने - - राम+सु इति स्थिते,**उपदेशेऽजनुनासिक इत्,तस्य लोपः**इति उकारस्य इत्वेन लोपे - - रामस्

ससजुषो रुःइति सकारस्य रुत्वे प्राप्ते - - रामर्

खरवसानयोः विसर्जनीयःइति रेफस्य विसर्गे प्राप्ते - - रामः इति रूपं प्राप्तम्।

२. 'राम' शब्दात् प्रथमायां द्विवचनप्रत्यययोजने - - राम राम+औ इति स्थिते, **सरूपाणामेकशेष एकविभक्तौ**इति - - राम+औ, (अत्र **प्रथमयोः पूर्वसवर्णः** इति प्राप्तः दीर्घः **नादिचि** इति सूत्रेण निषिध्यते।) **वृद्धिरेचि**इति वृद्धेः प्रवृत्तौ - - रामौ इति रूपं सिद्धम्।

३. 'राम' इति शब्दात् प्रथमायां बहुवचनप्रत्यययोजने - - राम+जस् इतिस्थिते, **चुटू ,तस्य लोपः** इति जस्य इत्संज्ञायां, लोपे च - - राम+अस् , (अत्र **न विभक्तौ तुस्माः** इति सकारस्य न इत्वम्) **प्रातिपदिकम्** – अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।

प्रथमयोः पूर्वसवर्णः इति पूर्वसवर्णदीर्घे (एकादेशे) प्राप्ते - रामास् , **ससजुषो रुः, खरवसानयोः विसर्जनीयः** इति रुत्वविसर्गप्राप्तौ - - रामाःइति रूपं निष्पन्नम् ।

II. द्वितीया विभक्तिः - - अम्—औट्—शस्

१. राम इति प्रातिपदिकाद् द्वितीयाविभक्तौ एकवचनप्रत्यययोजने - - राम+अम् इति स्थिते, **अमि पूर्वः**इति सूत्रेण पूर्वरूपस्य एकादेशे - - राममइति रूपं सिद्धम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. राम इति शब्दात् द्वितीयायां द्विवचनप्रत्यययोजने - - राम+औट् इति स्थिते, **हलन्त्यम्** , **तस्य लोपः** इति टकारस्य इत्संज्ञायायां, लोपे च - - राम+औ, **वृद्धिरेचि**इति वृद्धेः प्रवृत्तौ - - रामौ इति रूपं प्राप्तम् ।

३. 'राम'शब्दात्द्वितीयायां बहुवचनप्रत्यययोजने - - राम+शस्इति स्थिते,**लशक्वतद्धिते,तस्य लोपः** इति शस्य इत्संज्ञायां, लोपे च - - राम+अस् , **प्रथमयोः पूर्वसवर्णदीर्घः** इति पूर्वसवर्णदीर्घे - - रामास् , **तस्माच्छसोः नः पुंसि** इति सकारस्य नत्वे - - रामान् इति रूपं निष्पन्नम् ।

III. तृतीया विभक्तिः - - टा—भ्याम् –भिस्

१. 'राम' इतिप्रातिपदिकात् तृतीयाविभक्तौ एकवचनप्रत्यययोजने - - राम+टा इति स्थिते, **टाङसिङसामिनात्स्याः** इति टाप्रत्ययस्य इनादेशे - - राम+इन, **आद् गुणः**इतिअकारेकारयोः स्थाने एकारे सति - - रामेण इति रूपं सिद्धम् ।

२. 'राम' इति प्रातिपदिकात् तृतीयायां द्विवचनप्रत्यययोजने - - - राम+भ्याम् इति स्थिते, **सुपि च**इति अदन्तस्य अङ्गस्य दीर्घे - - रामाभ्याम् इति रूपं निष्पन्नम् ।

३. 'राम' शब्दात् तृतीयायां बहुवचनप्रत्यययोजने - - राम+भिस् इति स्थिते, **अतो भिस ऐस्** इति भिसःस्थाने 'ऐस्'आदेशे - - राम+ऐस्, **वृद्धिरेचि** इति अकारैकारयोः स्थाने ऐकारादेशे - - रामैस्

खरवसानयोः विसर्जनीयः, ससजुषो रुः इति रुत्वविसर्गप्राप्तौ - - रामैर् - - रामैःइति रूपं प्राप्तम्।

IV. चतुर्थी विभक्तिः - - ङे—भ्याम्— भ्यस्

१. 'राम'इति प्रातिपदिकात् चतुर्थीविभक्तौ एकवचनप्रत्यययोजने - - राम+ङे इति स्थिते,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ङेर्यः इति यकारादेशे सति - - राम+य,

सुपि च इति यादेशस्य स्थानिवत्भावेन सुस्वात् अतोऽङ्गस्य दीर्घे - - रामायइति रूपं सिद्धम् ।

२. 'राम' इति प्रातिपदिकात् चतुर्थीविभक्तौ द्विवचनप्रत्यययोजने - - राम+भ्याम् इति स्थिते,

सुपि चइति अदन्तस्य अङ्गस्य दीर्घे - - रामाभ्याम्इति रूपं प्राप्तम् ।

३. 'राम्'शब्दात् चतुर्थ्यां बहुवचनप्रत्यययोजने - - राम+भ्यस् इति स्थिते,

बहुवचने झल्येत् इति अतोऽङ्गस्य एकारे - - रामेभ्यस्,

ससजुषो रुः, खरवसानयोः विसर्जनीयः इति रुत्वविसर्गसिद्धौ - - रामेभ्यः इति रूपं निष्पन्नम् ।

V. पञ्चमी विभक्तिः - - ङसि—भ्याम्—भ्यस्

१. 'राम' इति प्रातिपदिकात् पञ्चमीविभक्तौ एकवचनप्रत्यययोजने - - राम+ङसि इति स्थिते,

टाङसिङसामिनात्स्याः इति 'आत्'आदेशे - - राम+आत्,

अकःसवर्णे दीर्घः इति दीर्घाकारस्य एकादेशे - - रामात् इति रूपसिद्धिः।

२. 'राम' इति प्रातिपदिकात् पञ्चम्यां द्विवचनप्रत्यययोजने - - राम+भ्याम् इति स्थिते,

सुपि च इति अदन्तस्य अङ्गस्य दीर्घे - - रामाभ्याम् इति रूपप्राप्तिः।

३. 'राम'शब्दात् पञ्चम्यां बहुवचनप्रत्यययोजने - - राम+भ्यस्,

बहुवचने झल्येत् इति अतोऽङ्गस्य एकारे - - रामेभ्यस्,

ससजुषो रुः, खरवसानयोः विसर्जनीयः इति रुत्वविसर्गप्राप्तौ - - रामेभ्यः इति रूपनिष्पत्तिः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

VI. षष्ठी विभक्तिः - - ङस्—ओस्—आम्

१. 'राम' इति प्रातिपदिकात् षष्ठीविभक्तौ एकवचनप्रत्यययोजने - - राम+ङस् इति स्थिते,

टाङसिङसामिनात्स्याः इति ङसः 'स्य'आदेशे - - रामस्य इति रूपसिद्धिः।

२. 'राम' शब्दात् षष्ठ्यां द्विवचनप्रत्यययोजने - - राम+ओस् इति स्थिते,

ओसि च इति अतोऽङ्गस्य एकारे - - रामे+ओस्,

एचोऽयवायावः इति अवादेशे - - रामय्+ओस्=रामयोस्,

ससजुषो रुः, खरवसानयोःविसर्जनीयः इति रुत्वविसर्गप्राप्तौ - - रामयोर् - - रामयोःइति

रूपप्राप्तिः।

३. 'राम'शब्दात् षष्ठ्यां बहुवचनप्रत्यययोजने - - राम+आम् इति स्थिते,

ह्रस्वनद्यापो नुट् इति नुडागमे - - राम+न् आम्, (नुटि टकार इत्,उकार उच्चारणार्थः)

नामि इति अजन्तस्य अङ्गस्य दीर्घे - - रामा+नाम्, 'रषाभ्यां नो णः समानपदे'

अट्कुप्वाङ्नुम्व्यवायेऽपि इति नकारस्य णत्वे प्राप्ते - - रामाणाम् इति रूपोपलब्धिः।

VII. सप्तमी विभक्तिः - ङि—ओस्—सुप्

१. 'राम' इति प्रातिपदिकात् सप्तमीविभक्तौ एकवचनप्रत्यययोजने - - राम+ङि

इति स्थिते,

लशक्वतद्धिते, तस्य लोपः इति ङकारस्य इत्वेन लोपे - - राम+इ,

आद्गुणः इति अकारेकारयोः गुणादेशे - - रामे इति रूपनिष्पत्तिः।

२. 'राम'शब्दात् सप्तम्यां द्विवचनप्रत्यययोजने - - राम+ओस् इति स्थिते,

ओसि च इति अतोऽङ्गस्य एकारे - - रामे+ओस्,

एचोऽयवायावः इति एकारस्य अयादेशे - - रामय्+ओस् =रामयोस्,

ससजुषो रुः, खरवसानयोःविसर्जनीयः इति रुत्वविसर्गप्राप्तौ - - रामयोःइतिरूपोपलब्धिः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. 'राम'शब्दात् सप्तम्यां बहुवचनप्रत्यययोजने - - राम+सुप् इति स्थिते,
हलन्त्यम्, तस्य लोपःइति अनुबन्धलोपे (पकारस्य इत्वे) - - राम+सु,
बहुवचने झल्येत् इति अतोऽङ्गस्य एकारे - - रामे+सु,
आदेशप्रत्ययोः इति सकारस्य मूर्धन्यादेशे - - रामेषु इति रूपसिद्धिः।

VIII. सम्बोधनप्रथमा विभक्तिः - - सु—औ—जस्

१. सम्बोधने एकवचनप्रत्यययोजने उकारलोपे च - - राम+स् इति स्थिते,
एङ्ह्रस्वात्सम्बुद्धेः इति सकारस्य लोपे - - राम इति रुपं सिध्यति ।

२.& ३. सम्बोधने द्विवचनबहुवचनरूपे प्रथमाया इव - रामौ - रामाः

सूत्रार्थाः

उपदेशेऽजननुनासिक इत् - उपदेशे अनुनासिकः अच् इत्संज्ञः स्यात् ।

तस्य लोपः - तस्य इतः लोपः स्यात् ।

ससजुषो रुः - पदान्तस्य सस्य 'सजुष्'शब्दस्य च रुः स्यात् ।

खरवसानयोः विसर्जनीयः - खरि अवसाने च परे पदान्ते विद्यमानस्य रेफस्य विसर्जनीयः स्यात् ।

सरूपाणामेकशेष एकविभक्तौ - एकविभक्तौ यानि सरूपाण्येव दृष्टानि, तेषामेक एव शिष्यते ।

प्रथमयोः पूर्वसवर्णः - अकःप्रथमाद्वितीययोः अचि परे पूर्वसवर्णदीर्घः एकादेशः स्यात्।

नादिचि - अवर्णात् इचि परे न पूर्वसवर्णदीर्घः।

वृद्धिरेचि - आत् एचि परे वृद्धिः एकादेशः स्यात् ।

चुटू - प्रत्ययाद्यौ चवर्गटवर्गौ इतौ स्तः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

न विभक्तौ तुस्माः	- विभक्तिस्थाः तवर्गसकारमकाराः इतो न स्युः।
अमि पूर्वः	- अकः अमि अचि परतः पूर्वरूपमेकादेशः स्यात्।
हलन्त्यम्	- उपदेशे अन्त्यं हल् इत् स्यात्।
लशक्वतद्धिते	- तद्धितभिन्नस्य प्रत्ययस्य आदिभूतमं लकारशकारकवर्गम् इत्संज्ञं भवति।
तस्माच्छसोः नः पुंसि	- कृतपूर्वसवर्णदीर्घात् परः यः शसः सकारः तस्य पुंसि नः स्यात्।
टाङसिङसामिनात्स्याः	- अकारान्तात् अङ्गात् 'टा, ङसि, ङस्' इत्यादीनां क्रमात् 'इन, आत्, स्य' इति आदेशाः स्युः।
आद् गुणः	- अवर्णादचि परे पूर्वपरयोः स्थाने एको गुणः आदेशः स्यात् संहितायाम्।
अट्कुप्वाङ्नुमव्यवायेऽपि	- अट् ,कवर्गः,पवर्गः,आङ् ,नुम् एतैः व्यस्तैः यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे।
सुपि च	- यञादौ सुपि परे अदन्तस्य अङ्गस्य दीर्घः स्यात्।
अतो भिस ऐस्	- अकारान्ताद् अङ्गाद् भिसः ऐस् स्यात्।
ङेर्यः	- अतोऽङ्गात् परस्य 'ङे' इत्यस्य यादेशः स्यात्।
बहुवचने झल्येत्	- झलादौ बहुवचने सुपि परे अतोऽङ्गस्य एकारः स्यात्।
ओसि च	- ओसि परे अतोऽङ्गस्य एकारः स्यात्।
एचोऽयवायावः	- 'ए ,ओ, ऐ ,औ' इत्यादीनां क्रमात् 'अय् ,अव् ,आय् ,आव्' एते स्युः अचि परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ह्रस्वनद्यापो नुट् - ह्रस्वान्तात् ,नद्यन्तात् ,आबन्तात् च अङ्गात् परस्य आमः नुडागमः स्यात् ।

नामि - नामि परे अजन्तस्य अङ्गस्य दीर्घः स्यात् ।

आदेशप्रत्ययोः - इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशः प्रत्ययावयवश्च यः सकारः तस्य मूर्धन्यादेशः स्यात् ।

एकवचनं सम्बुद्धिः - सम्बोधने प्रथमायाः एकवचनं सम्बुद्धिसंज्ञं स्यात् ।

एङ्ह्रस्वात्सम्बुद्धेः - एङन्तात् ह्रस्वान्तात् च अङ्गात् परं सम्बुद्धेः हल् लुप्यते ।

(अङ्गम् - - यः प्रत्ययः यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परे अङ्गसंज्ञं स्यात्।)

- - -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

10. वृत्तिः

द्वाभ्यां पदाभ्यां, बहुभिर्वा पदैः, बोधनीयोऽर्थः संस्कृतभाषायां कदाचिद् एकेन पदेन बोधयितुं शक्यते। यथा—वसुदेवस्य अपत्यं पुमान् – वासुदेवः, दशरथस्य अपत्यं पुमान् – दाशरथिः। वसुदेवस्य अपत्यं पुमानित्यस्यार्थः, वासुदेवः इत्येकेन पदेन बोध्यते। अस्य लघुमार्गस्य 'वृत्ति' इति संज्ञा। वृत्यर्थप्रतिपादकपदजालं विग्रहवाक्यमिति उच्यते।

वृत्तयः पञ्च – १) कृद्वृत्तिः २) तद्धितवृत्तिः ३) सनाद्यन्तधातुवृत्तिः

४) एकशेषवृत्तिः ५) समासवृत्तिः

१) कृद्वृत्तिः - कृत्प्रत्ययाः धातुभ्यः केषुचिदर्थविशेषेषु विधीयन्ते। तादृशी कृदन्तधातुवृत्तिरेव कृद्वृत्तिरिति उच्यते। प्रायेण नामशब्दाः सर्वे धातुभिः कृत्प्रत्ययानां योजनेन निष्पन्नाः।

यथा – "भक्तानामपि मर्त्यानाम् अमराणामथापि वा।
संपादयति यद् ज्ञानं तां वाचं प्रणमाम्यहम्" ॥

भजन्ते इति(भज्+क्त) भक्ताः। ज्ञायते अनेन इति(ज्ञा+ल्युट्) ज्ञानम्। उच्यते इति(वाच्+क्विप्) वाक्। म्रियन्ते इति(मृ+तन् - मर्त, मर्त+यत्) मर्त्याः।

कुम्भं करोति इति कुम्भकारः, करोति इति(कृ+अण्) कारः इत्यादयः ।

२) तद्धितवृत्तिः - तद्धितप्रत्ययाः अपत्याद्यर्थविशेषेषु नामभ्यो विधीयन्ते। तद्धितान्तसुबन्तानांवृत्तिरेव तद्धितवृत्तिः।

यथा – "मानुषाणादितेयान् वा पीडयन्तो भुवि स्थिताः।
ये दैतेयास्तान् निहन्तुं जातो दाशरथिर्हरिः॥"

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मनोः अपत्यानि पुमांसः - मानुषाः। अदितेः अपत्यानि पुमांसः - आदितेयाः।

दितेः अपत्यानि पुमांसः - दैतेयाः। रघोः गोत्रापत्यं पुमान् – राघवः(अण् प्रत्ययः)। दशरथस्य अपत्यं पुमान् – दाशरथिः(इञ् प्रत्ययः)। इन्द्रस्य अपत्यं पुमान् – ऐन्द्रिः(इञ् प्रत्ययः)। विरोचनस्य अपत्यं पुमान् – वैरोचनिः(इञ् प्रत्ययः)।

३) सनाद्यन्त धातुवृत्तिः - धातुभ्यः नामभ्यः च तत्तदर्थविशेषेषु सनादयः प्रत्ययाः भवन्ति। तादृशप्रत्ययान्ताः सर्वेऽपि तिङन्ताः धातवः भवन्ति। ए प्रत्ययाः नामभ्यः विधीयन्ते, तत्प्रययुक्ताः धातवः नामधातवः इति उच्यन्ते ।

सनादिप्रत्ययाः - 'सन् - क्यच् - काम्यच् - क्यङ् - क्यपोऽथाचारक्विप् - णिच्यङः तथा। यगाय - ईयङ् - णिङ् चेति द्वादशामीसनादयः॥'

1 - सन्नन्ताः - (इच्छत्यर्थे)

यथा - कृ/कर् – कर्तुमिच्छति – चिकीर्षति।

जि - जेतुमिच्छति – जिगीषति।

ज्ञा – ज्ञातुमिच्छति – जिज्ञासते।

दृश् – द्रष्टुमिच्छति – दिदृक्षते।

2 - क्यजन्ताः - (इच्छत्यर्थे) - पुत्रम् आत्मनः इच्छति - पुत्रीयति।

यशः आत्मनः इच्छति - यशस्यति ।

आचारार्थे - पितरमिव आचरति - पित्रीयति ।

प्रासादे इव आचरति - प्रासादीयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3 - काम्यजन्ता: (इच्छत्यर्थे) - पुत्रम् आत्मन: इच्छति - पुत्रकाम्यति।

यश: आत्मन: इच्छति - यशस्काम्यति।

4 - क्यङन्ता: (आचारार्थे) - हंस: इव आचरति - हंसायते।

गरुड: इव आचरति - गरुडायते।

कृष्ण: इव आचरति - कृष्णायते।

सिंह: इव आचरति - सिंहायते।

5 - क्यबन्ता: (आचारार्थे) - लोहित: भवति - लोहितायति, लोहितायते।

मन्द: भवति - मन्दायति, मन्दायते ।

6 - क्विबन्ता: (आचारार्थे) - हंस: इव आचरति - हंसति।

कृष्ण: इव आचरति - कृष्णति।

7 - णिजन्ता:।

१) (प्रेरणार्थे) - गम्/गच्छ – गमयति - ते भू/भव् – भावयति - ते

कृ/कर् – कारयति - ते हन् – घातयति - ते

दा – दापयति - ते। दृश् – दर्शयति - ते

दशरथ: रामं वनं गमयति।

२) (स्वार्थे) – चोरयति, चोरयते।

३) (तत्करोत्याचष्टे इत्यर्थे)

सत्यं करोति आचष्टे वा – सत्यापयति, सत्यापयते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

8 - यङन्ताः - (पौनःपुन्ये अतिशयार्थे वा)

यथा - भू+यङ् – पुनः पुनः/अतिशयेन भवति = बोभूयते।

जि + यङ् – पुनः पुनः/अतिशयेन जयति = जेजीयते।

9 - यगन्ताः कण्डुम् अपनुदति – कण्डूयति।

दुःखम् अनुभवति – दुख्यति।

समरं करोति – समरयति। महीमर्हति –महीयते।

10 - आयान्ताः (स्वार्थे) – गुपू (रक्षणे)+आय – गोपायति।

धूप (भाषायां)+आय – धूपायति।

11 - ईयङन्ताः (स्वार्थे) – ऋत+ईय - ऋतीयते।

12 - णिङन्ताः पुच्छम् उदस्यति – उत्पुच्छयते।

भाण्डानि समचिनोति – सम्भाण्डयते।

४) एकशेषवृत्तिः (पञ्चम्यां पाठमालायां व्याख्यातम्)

सर्वेषामपि लोकानां पितरौ यौ सनातनौ।

विदितौ पालनाच्चित्ते तौ शिवौ सततं भजे॥

१- सनातनी च सनातनः च = सनातनौ।

२- माता च पिता च = पितरौ।

३- विदिता च विदितः च = विदितौ।

४- सा च सः च = तौ।

५- शिवा च शिवः च = शिवौ।

५) समासवृत्तिः (पूर्वं व्याख्यातम्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1 - तत्पुरुषसमासः। 2 - कर्मधारयसमासः।

3 - बहुव्रीहिसमासः। 4 - द्विगुसमासः।

5 - द्वन्द्वसमासः। 6 - अव्ययीभावसमासः।

लुक्समासः - अलुक्समासः, नित्यसमासः - अनित्यसमासः च समासवृत्तौ अन्तर्हिताः विशेषसमासाः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

11. वृत्तम्

संस्कृतरचनाः गद्यपद्यभेदेन द्विविधा भवन्ति। तत्र पद्यं चतुष्पादयुक्तं छन्दोबद्धं च दृश्यते। पद्यनिषेवणाय छन्दःशास्त्रज्ञानम् आवश्यकम् । पिङ्गलादिभिः आचार्यैः छन्दोग्रन्थाः कृताः। तेषु लौकिकछन्दांसि अधिकृत्य श्रीभट्टकेदारप्रणीतः वृत्तरत्नाकरः प्रसिद्धः सरलश्च। अत्र वृत्तानां लक्षणानि तत्तद्वृत्तघटितानि दृश्यन्ते।

लौकिकं छन्दः वर्णमात्राविभेदेन द्विविधं भवति। वर्णच्छन्दः नियतगुरुलघुविन्यासं वृत्तमित्युच्यते। वृत्तमुक्तादि। मात्राच्छन्दः नियतमात्रिका जातिरित्युच्यते। जातिः आर्यादिः।

वृत्तं समवृत्तम् ,अर्धसमवृत्तं, विषमवृत्तमिति त्रिधा भिद्यते। यस्य चत्वारोऽपि पादाः तुल्येन लक्षणेन युक्ताः तत् समवृत्तं भवति। यस्य प्रथमपादसमः तृतीयपादः, द्वितीयचरणश्च चतुर्थचरणवत् तदेव अर्धसमवृत्तमस्ति। यस्य पादचतुष्टयेऽपि लक्ष्यलक्षणं भिद्यते तद् विषमं भवति।

वर्णच्छन्दसु त्रयक्षरयुक्ताः अष्टौ गणाः भवन्ति। समस्तवर्णाः गुरुः(ऽ) लघुः(।) इति द्विधा भिद्यन्ते। सर्वे ह्रस्वाः वर्णाः लघवः भवन्ति, दीर्घाश्च गुरवः। किन्तु अनुस्वारयुक्तः, विसर्गान्तः, संयुक्तपरः ह्रस्वः गुरुरेव। अपि च पादान्ते वर्तमानो लघुः अपेक्षानुसारेण गुरुर्वा भवति।

गणानां स्वरूपमधिकृत्य कारिका इयम् - - -

आदिमध्यावसानेषु यरता यान्ति लाघवम्।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥

अर्थात्, मगणः - - ऽऽऽ, नगणः—।।।, यगणः—।ऽऽ, रगणः - - ऽ।ऽ, तगणः - - ऽऽ।, भगणः - - ऽ।।, जगणः - - ।ऽ।, सगणः - - ।।ऽ

इदानीं केषाञ्चन समवृत्तानां लक्षणानि पश्यामः - - - -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१) **वसन्ततिलका - - - उक्ता वसन्ततिलका तभजा जगौ गः।**

इयं वसन्ततिलका चतुर्दशाक्षरसमेतायाः शक्करीजात्याः भेदः। यत्र त - भ - ज - जगणाः गुरू च भवन्ति, तद् वृत्तं वसन्ततिलका इत्युच्यते।

२) **हरीणी - - - - रसयुगहयै,र्न्सौ म्रौ स्लौ गो यदा हरिणी तदा।**

इदं वृत्तं सप्तदशाक्षरयुक्तायाः अत्यष्ट्याः भेदेषु एकतमम् । यदा प्रतिचरणं न - स - म - र - सगणाः लघुगुरू च भवन्ति, तदा तत् 'हरिणी' इति कथ्यते। रसैः—षड्भिः, युगैः - - - चतुर्भिः, हयैः - - सप्तभिः च यतिः।(यतिः—विरामः)

३) **शिखरिणी - - - रसै रुद्रैश्छिन्ना, यमनसभला गः शिखरिणी।**

सप्तदशाक्षरायाः अत्यष्टिजात्याः भेदः शिखरिणीवृत्तमिदम् । यस्य सर्वः पादः य - म - न - स - भ गणैः, लघुगुरुभ्यां च युक्तो भवति, तत् शिखरिणी नाम वृत्तं भवति। सा रसैः - षड्भिः, रुद्रैः - एकादशभिः, छिन्ना यतिमती भवति।

४) **मन्दाक्रान्ता - - - - मन्दाक्रान्ता, जलधिषडगै, म्भौ नतौ ताद् गुरू चेत् ।**

सप्तदशाक्षरयुक्तायाः अत्यष्टिजात्याः भेदेषु एकतमा मन्दाक्रान्ता। यदि एकैकः पादः म - भ - न - त - त - गणैः गुरुभ्यां च युक्तो भवेत् , तर्हि तद् मन्दाक्रान्ता नाम वृत्तं भवति।

५) **शार्दूलविक्रीडितम् - - - - सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।**

यः पादः मसजसततगणैः गुरुणा च समेतः, तद् वृत्तं शार्दूलविक्रीडितमिति। द्वादशभिः सप्तभिश्च यतिः।

६) **पृथ्वी - जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः।**

अत्यष्टिजात्याः भेदेषु एकतमा इयं पृथ्वी। अस्य वृत्तस्य एकैकपादेऽपि ज - स - ज - स - य गणाः लघुगुरू च भवन्ति। अष्टसु (वसुषु), नवसु (ग्रहेषु) च यतिः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

७) **वंशस्थम् - जतौ तु वंशस्थमुदीरितं जरौ।**

द्वादशाक्षरयुक्तायाः जगतीजात्याः भेदेषुएकतमं वंशस्थम् ।

८) **उपजातिः - एकत्रपादे चरणद्वये वा पादत्रये वान्यतरः स्थितश्चेत् । तयोरिहान्यत्र तदोहनीयाश्चतुर्दशोक्ता उपजातिभेदाः॥**

समानजातिकयोः द्वयोः वृत्तयोः सङ्करे उपजातित्वम् । चरणद्वयस्थितजातिः अन्यचरणद्वयस्थितजात्याः भिन्ना चेत् .तत्र अर्धसमत्वम्। समजातिकयोरपि किञ्चिद्वैशिष्ट्यं विहाय सर्वेषु अंशेषु यत्र साम्यं सम्भवति, तत्रैव मेलनम् ।तदपि कविजनसमाचरितस्य श्रुतिसुखकरस्य वृत्तद्वयस्य। सर्वेषु उपजातिषु १४ भेदाः भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

12. सुभाषितरत्नानि

1. प्रहेलिका:

अपदो दूरगामी च साक्षरो न च पण्डित:। अमुख: स्फुटवक्ता च यो जानाति स पण्डित:॥ = लेखपत्रम्।

अनेकसुषिरं वाद्यं कान्तं च ऋषिसंज्ञितम्। चक्रिणा च सदाराध्यं यो जानाति स पण्डित:।। (सुषिरं - बिलं, वाद्यं - वकार आद्यो यस्य, कान्तं - ककारोऽन्ते यस्य, चक्रिणा - सर्पेण) = वल्मीकम्।

एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नग:। क्षीयते वर्धते चैव न समुद्रो न चन्द्रमा:॥

=सूचिका।

दन्तैर्हीन: शिलाभक्षी निर्जीवो बहुभाषक:। गुणस्यूतिसमृद्धोऽपि परपादेन गच्छति॥

=उपानह्।

न तस्यादिर्न तस्यान्तो मध्ये यस्तस्य तिष्ठति। तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद॥ = नयनम्।

पर्वताग्रे रथो याति भूमौ तिष्ठति सारथि:। चलते वायुवेगेन पदमेकं न गच्छति॥

= कुलालचक्रदण्डौ।

पर्वताग्रे रथारूढो भूमौ तिष्ठति सारथि:। चक्रवद्भ्रमते पृथ्वी तस्याहं कुलबालिका॥

= कुम्भकारस्य।

वृक्षाग्रवासी न च पक्षिराजस्त्रिनेत्रधारी न च शूलपाणि:। त्वग्वस्त्रधारी न च सिद्धयोगी जलं च बिभ्रन्न घटो न मेघ:॥ =नारिकेरफलम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपूर्वोऽयं मया दृष्टः कान्तः कमललोचने। शोऽन्तरं यो विजानाति स विद्वान्नात्र संशयः॥ = अशोकः।

2. कूटानि।

केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः। रुदन्ति कौरवाः सर्वे हा केशव कथं गतः॥ (के - जले, शवं - मृतकं, द्रोणो - कृष्णकाकः, कौ रवाः - शृगालाः)

विषं भुङ्क्ष्व महाराज स्वजनैः परिवारितः। विना केन विना नाभ्यां कृष्णाजिनमकण्डकम्॥ (विषं - विगतः षकारो यस्मात्, केन - ककारेण विना, नाभ्यां - नकारद्वयरहितं, कृष्णाजिनं - अत्र ककार - षकार - नकाराणां निष्कासने 'ऋ आजि अम्' इति स्थिते संधौ कृते 'राज्यम्', अकण्डकं - शत्रुरहितम्)

यस्य षष्ठी चतुर्थी च विहस्य च विहाय च। अहं कथं द्वितीया स्याद्वितीया स्यामहं कथम्॥ (द्वितीया स्यां - सहधर्मिणी स्याम्)

शंकरं पतितं दृष्ट्वा पार्वती हर्षनिर्भरा। रुरुदुः पन्नगाः सर्वे हा हा शंकर शंकर॥ (शंकरं - श्रेष्ठचन्दनम्, पार्वती - पर्वतवासिनी स्त्री भिल्ली)

हनूमति हतारामे वानारा हर्षनिर्भराः। रुदन्ति राक्षसाः सर्वे हा हा राम हता हताः॥ (हतारामे - हते आरामे, रावणस्योद्याने दाहिते सतीत्यर्थः)

विराजराजपुत्रारेर्यन्नाम चतुरक्षरम्। पूर्वार्धं तव शत्रूणां परार्धं तव संगरे॥ (विः वी वयः - पक्षिणस्तेषां राजा गरुडस्तद्राजा विष्णुस्तत्पुत्रो मदनस्तदरिः शिवस्तस्य चतुरक्षरं नाम 'मृत्युंजयः' इति। तत्पूर्वार्धं मृत्युरिति संगरे तव शत्रूणाम्। उत्तरार्धं जय इति तव)

अहं च त्वं च राजेन्द्र लोकनाथावुभावपि। बहुव्रीहिरहं राजन्षष्ठीतत्पुरुषो भवान्॥ (बहुव्रीहिपक्षे - लोका(जना) नाथाः(स्वामिनः) यस्य एवंविधोऽहं याचकत्वात्, षष्ठीतत्पुरुषपक्षे - लोकानां(जनानां) नाथः एवंविधस्त्वं राजत्वेन पालकत्वात्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शमीगर्भस्य यो गर्भस्तस्य गर्भस्य यो रिपुः। रिपुर्गर्भस्य यो भर्ता स मे विष्णुः प्रसीदतु॥ (शम्याः शमीवृक्षस्य गर्भोऽन्तःसारस्तस्य गर्भोऽग्निस्तन्मन्थनेन उद्भूयमानत्वात्, तस्याग्नेः रिपुर्जलं तद्गर्भो लक्ष्मीस्तस्याः सागरमथनेन जलजात्वात् तस्या भर्तेत्यादि। शमीगर्भपदेन अश्वत्थ इत्यपि केचित् तदापि सुवचम् अश्वत्थस्यापि वह्नियोनित्वात्)।

3. चाटुश्लोकाः

याचना हि पुरुषस्य महत्वं नाशयत्यखिलमेव तथा हि।
सद्य एव भगवानपि विष्णुः वामनो भवति याचितुमिच्छन् ॥

वैद्यराज! नमस्तुभ्यं यमराजसहोदर!।
यमस्तु हरति प्राणान् वैद्यः प्राणान् धनानि च ॥

चितां प्रज्वलितां दृष्ट्वा वैद्यो विस्मयमागतः ।
नाहं गतो न मे भ्राता कस्येदं हस्तलाघवम् ॥

कपिरपि च, मधुना मदमत्तश्च, वृश्चिकेन संदष्टः ।
अपि च पिशाचग्रस्तः , किं ब्रूमो वैकृतं तस्य ॥

वने चरामो वसु चाहरामो नदीस्तरामो न भयं स्मरामः ।
इतीरयन्तोऽपि वने किराता मुक्तिं गता रामपादानुषङ्गात् ॥

अहमेव गुरुः सुदारुणानामिति हालाहल! मास्म तात! तृप्तः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानाम् ॥

मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः ।
एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः ॥

तृणादपि लघुस्तूलः तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. सज्जनप्रशंसा

अहो किमपि चित्राणि चरित्राणि महात्मनाम्।
लक्ष्मीं तृणाय मन्यन्ते तद्भरेण नमन्त्यपि॥

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हसि॥

गवादीनां पयोऽन्येद्युः सद्यो व जायते दधि।
क्षीरोदधेस्तु नाद्यापि महतां विकृतिः कृतः॥

गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा।
पापं तापं च दैन्यं च घ्नन्ति सन्तो महायशाः॥

छायावन्तो गतव्याला स्वारोहाः फलदायिनः।
मार्गद्रुमा महान्तश्च परेषामेव भूतये॥

5. धनप्रशंसा

अहो कनकमाहात्म्यं वक्तुं केनापि शक्यते।
नामसाम्यादहो चित्रं धत्तूरोऽपि मदप्रदः॥ (धत्तूरः कनकाह्वयः - कोशः)

न वित्तं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो।
मुनेरपि यतस्तस्य दर्शनाच्चलते मनः॥

धनमर्जय काकुत्स्थ धनमूलमिदं जगत्।
अन्तरं नैव पश्यामि निर्धनस्य मृतस्य च॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

6. धननिन्दा

अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते।
जनितारमपि त्यक्त्वा निःस्वं गच्छति दूरतः॥

लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम्।
शेषे धराभरक्लान्ते शेते नारायणः सुखम्॥

वरं हालाहलं पीतं सद्यः प्राणहरं विषम्।
न तु दृष्टं धनान्धस्य भ्रूभङ्गकुटिलं मुखम्॥

बधिरयति कर्णविवरं वाचं मूकयति नयनमन्धयति।
विकृतयति गात्रयष्टिं संपद्रोगोऽयमद्भुतो राजन्॥

लक्ष्म्या परिपूर्णोऽहं न भयं मेऽस्तीति मोहनिद्रैषा।
परिपूर्णस्यैवेन्दोर्भवति भयं सिंहिकासूनोः॥ (सिंहिकासूनुः - राहुः)

7. दानप्रशंसा

यद्ददाति यदश्नाति तदेव धनिनो धनम्।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि॥

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः॥

आयासशतलब्धस्य प्राणेभ्योऽपि गरीयसः।
गतिरेकैव वित्तस्य दानमन्या विपत्तयः॥

दानेन श्लाघ्यतां यान्ति पशुपाषाणपादपाः।
दानमेव गुणः श्लाघ्यः किमन्यैर्गुणकोटिभिः॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

8. लोभनिन्दा

लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च।
द्वेषक्रोधादिजनको लोभः पापस्य कारणम्॥

लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम्॥

मातरं पितरं पुत्रं भ्रातरं वा सुहृत्तमम्।
लोभाविष्टो नरो हन्ति स्वामिनं वा सहोदरम्॥

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम्।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः॥

लोभाविष्टो नरो वित्तं वीक्षते न स चापदम्।
दुग्धं पश्यति मार्जारो न तथा लगुडाहतिम्॥

9. परोपकारप्रशंसा

परोपकारः कर्तव्यः प्राणैरपि धनैरपि। परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि॥

रविचन्द्रौ घना वृक्षा नदी गावश्च सज्जनाः। एते परोपकाराय युगे देवेन निर्मिताः॥

तृणं चाहं वरं मन्ये नरादनुपकारिणः। घासो भूत्वा पशून्याति भीरून्पातिरणाङ्गणे॥

आत्मार्थं जीवलोकेऽस्मिन्को न जीवति मानवः। परं परोपकारार्थं यो जीवति स जीवति॥

पद्माकरं दिनकरो विकचं करोति चन्द्रो विकासयति कैरवचक्रवालम्।
नाभ्यर्थितो जलधरोऽपि जलं ददाति सन्तः स्वयं परहितेषु कृताभियोगाः॥
(कैरवचक्रवालं - कुमुदमण्डलम्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

10. धीरप्रशंसा

स एव धन्यो विपदि स्वरूपं यो न मुञ्चति। त्यजत्यर्ककरैस्तप्तं हिमं देहं न शीतताम्।।

चलन्ति गिरयः कामं युगान्तपवनाहताः। कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः॥

- - - -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

PATAMALA - 1 - PATAMALA - 2 - PATAMALA - 3

PATAMALA - 4 - PATAMALA - 5 - PATAMALA - 6

PATAMALA-7 PATAMALA-8 DHATUMALA - 1

KRUDANTARUPAMALA-PART 1to 5

SAMSKRITHASRI MONTHLY MAGAZINE

SABDAMANJARI - AVYAYAKOSAH

Books Available at

SAMSKRIT EDUCATION SOCIETY

Old No. 212 / 13-1, St. Mary's Road,

R.A. Puram, Chennai - 600 028. Phone : 24951402

(Near Subham Ganesan)

Printed at : Jai Ganesh Offset Printers, 9840111457

CC-0. In Public Domain. Cuddalore Collection. TN.